ASTH VIRNTH TICKA
474 G.K.D

7244

1. Title Yamshṭavakra Tīkā
2. Accession No. 5691
3. Folio No./Pages 55
4. Lines 10-12
5. Size 26.5×13Cm.
6. Substance Paper
7. Script Devanāgarī
8. Language Sanskrit
9. Period Not mentioned
10. Beginning "ओम् श्री [illegible]शाय नमः यदज्ञानादि दं जातं [illegible] ज्ञानादि लीयते..."
11. [illegible] प्रोक्तं [illegible] नामाष्टा दशं प्रकरणं
12. [illegible] No
13. [illegible]ations No
14. Source Donation
15. Subject Sanskāra
16. Revisor Vishveshvar
17. Author Mahishvar
18. Remarks Pages are in order, bound, fair condition.

अष्टा०
१

ॐ श्रीगणेशाय नमः यदज्ञानादिदं जातं यद्विज्ञानाद्विलीयते तं नत्वा सच्चिदानंदं कुर्वे धात्मप्रदीपिकां १ इह नावदात्मानंदानुभवपरिपूर्णस्ततः परिपूर्णीकृतानेकशिष्यव्रातः परमकारुणिको भगवानष्टावक्रमुनिः सकलमुमुक्षुजनमुद्दिधीर्षुः शिष्यं प्रति मोक्षोपायमुपदिशति॥ मुक्तिमिति॥ तातेति सानुग्रहसंबोधने हे शिष्य चेत्त्वं मुक्तिं सर्वानर्थनिवृत्तिं परमानंदावाप्तिरूपामिच्छसि तर्हि विषवत् विषयान् त्यज तेन तत्र विषयान् शब्दस्पर्शरूपरसगंधाञ्जनकउवाच॥ कथं ज्ञानमवाप्नोति कथं मुक्तिर्भविष्यति वैराग्यं च कथं प्राप्तमेतत्त्वं ब्रूहि मे प्रभो॥१॥

अष्टावक्र उवाच॥ मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज क्षमार्जवदयातोषसत्यं पीयूषवद्भज॥२॥

त्यज आश्रयं त्यज॥ तत्र सक्तिमाकार्षीः अनर्थहेतुत्वादित्यर्थः॥ एतेनानर्थनिवृत्तिर्मुक्तेरुपायउक्तः अथ परमानंदावाप्तिरूपाया मुक्तेरुपायमाह॥ क्षमेति॥ क्षमा नाम सर्वसहनं सर्वावधिशून्यत्वमात्मधर्मः॥ आर्जवं नाम अविद्यारूपकुहकसंबंधाभावः सोप्यात्मधर्मः॥ दयानाम

शिव०
१

५

निरुपाधिकसर्वहितानुवर्तित्वं सोप्यात्मधर्मः॥ तोषो नाम सुखं तदप्यात्मस्वरूपं॥ सत्यं नाम कालत्रयाबाध्यस्वरूपं सोप्यात्मैव॥ एवंविधमात्मस्वरूपं पीयूषवद्भज॥ यथा पीयूषममृतमश्नीयते तद्वत्क्षमार्जवदयोपेतं स्वस्वरूपं॥ कालत्रयाबाध्यमात्मतत्त्वमाश्रयस्वेत्यर्थः परमानंदावाप्तिहेतुत्वादित्यर्थः॥२॥ ननु पांचभौतिको देह एवात्मा तथा च भूतानां तद्धर्माणां च त्यागो न संभावितः नहि पृथिव्यादीनां स्वभावभूतो गंधादिः कालत्रयेपि त्यज्यते इत्याशंक्य पृथिव्यादिरूपस्त्वं न भवसीत्याह॥ नपृथ्वीति॥ हे शि

लं न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान् एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये ३॥

मं ष्य पृथिव्यप्तेजोवाय्वाकाशानां रूपस्त्वं न भवसि ततस्तमनात्मधर्मान्विषयांस्त्यजेत्यर्थः। नन्वहं गौरः स्थूल इत्यादिप्रतीतेः पांचभौतिको देह एवात्मा इत्यत आह एषामिति एषां देहादीनां साक्षिणमेवात्मानं विद्धि साक्षात्कुरु तथा च देहादेः साक्षी आत्मा देहादिभ्यो भिन्नः यथा घटद्रष्टा घटादिभिन्न इत्यर्थः नैयायिकाभिमतमात्मानं निराकरोति चिद्रूपमिति आत्मज्ञानस्य फलमाह॥ मुक्तये इति २ आत्यंतिकी दुःखनिवृत्तिर्मुक्तिरिति प्राभाकराः आत्महानं मुक्तिरिति बौद्धाः इत्यादिमतानि निराकुर्वन्नेवात्मज्ञानाज्जीवन्मुक्तिदशामाह॥

अष्टा० २

यदीति हे शिष्य यदि त्वं देहं पृथक्कृत्य देहादिभ्यो विविच्य चिति विश्राम्य चिदेकाग्रो भूत्वा तिष्ठसि तर्हि त्व मधुनैव इदानीमेतावद्दशायामेव सुखी प्राप्तपरमानंदोत एव शांतः सुप्रसन्नमनाः बंधमुक्तः कर्तृत्व भोक्तृत्वप्रमुखानर्थरहितो भविष्यसीत्यर्थः ३ ननु वर्णाश्रमप्रयुक्तानि कर्माणि विहाय चिति विश्रा म्यावस्थानं कथं युक्तमित्याशंक्यात्मनो वर्णाश्रमविलक्षणत्वमाह नत्वमिति त्वं वर्णाश्रमविलक्षण इत्यर्थः नन्वहं ब्राह्मण इत्यादिज्ञानस्य प्रत्यक्षबलादात्मैव वर्णाश्रमीत्याशंक्याह ॥ नाक्षगोचर इति

यदि देहं पृथक्कृत्य चिति विश्राम्य तिष्ठसि अधुनैव सुखी शांतो बंधमुक्तो भविष्यसि ३ न त्वं विप्रा दिको वर्णो नाश्रमी नाक्षगोचरः असंगोसि निराकारो विश्वसाक्षी सुखी भव ॥४॥

अयं ब्राह्मण इत्यादिप्रत्ययस्तु देहगोचर एव न त्वात्मगोचरस्तस्येंद्रियकज्ञानागोचरत्वादित्यर्थः ॥ २
तर्हि कीदृशोहमित्याशंक्यात्मानं निरूपयन्नेव तद्विश्रांतिफलमनुवदति असंगः सर्वोपाधिसंगरहि तः निराकारो विश्वसाक्षी त्वमसि अतः चासंगादिरूपस्य तव वर्णाश्रमविलक्षणत्वात्कर्मासक्ति

अष्टा० ३

एवं बंधहेतुरुक्तोऽथानर्थहेतुं वदन्नेव तन्निवृत्तिपरमानंदावाप्तिरूपायमनुवदति अहं कर्तेति हे शिष्य अहं कर्तेत्येवंरूपो योऽहंमानोहमिति आत्मनि कर्तृत्वाभिमानस्तद्रूपो महा न्कृष्णसर्पः सुबद्धः खविषावहस्तेन दंशितः कवलीकृतोऽतः कारणान्न कर्ता अहमकर्ता आत्मा इत्येवंरूपं विश्वासामृतं निश्चयामृतं पीत्वानुभूय सुखी भव प्राप्तपरमानंदो भवेत्यर्थः ॥७॥

अहं कर्तेत्यहंमानमहाकृष्णाहिदंशितः नाहं कर्तेति विश्वासामृतं पीत्वा सुखी भव ७ एको विशुद्धबोधोहमिति निश्चयवह्निना प्रज्वाल्याज्ञानगहनं वीतशोकः सुखी भव ८॥

शिव० ३

नन्वात्मज्ञानामृतपानं किंद्वारा सुखसाधनमित्याशंक्याज्ञानकाननदहनद्वारा ज्ञानाग्निः॥ सुखसाधनमित्याह एको विशुद्धबोधोहमिति एकः सजातीयविजातीयस्वगतभेदरहितः विशुद्धबोधः चिदात्माहमिति निश्चयाग्निना अज्ञानारण्यगहनं प्रज्वाल्य प्रकर्षेण दग्ध्वा मोह रागद्वेषप्रवृत्तिजन्यापायाद्वीतशोकः विगतदुःखः सन्सुखी भवेत्यर्थः ॥८॥ ननु ज्ञानेन त्र

परिहारायच्चितिविश्रान्त्यसुखेनैवाग्नपरमानंदो भवेत्यर्थः॥४॥ ननु वेदोदितं कर्म विहाय चिति
विश्रांतावपि प्रत्यवायशंका इत्यत आह धर्माधर्माविति धर्माधर्मादयो मनोधर्मा एव काल
त्रयेपि तैः सह तव संबंधो नास्तीत्यर्थः न कर्त्तेति किंच विहितनिषिद्धकर्मकर्त्तुर्धर्मादिद्वारा
सुखदुःखभोक्तृत्वं तदपि तव संबंधो नास्ति शुद्धबुद्धस्वरूपत्वात् त्वं सर्वदा मुक्त एवाज्ञान
मात्रविजृंभितं बंधसुखदुःखहेतुः चितिविश्रांत्यैवाज्ञाननिवृत्त्या न विजृंभिष्यते इत्यर्थः

॥५॥ धर्माधर्मौ सुखं दुःखं मानसानि न ते विभो न कर्त्तासि न भोक्तासि मुक्त एवासि सर्वदा॥
एको द्रष्टासि सर्वस्य मुक्तप्रायोसि सर्वदा अयमेव हि ते बंधो द्रष्टारं पश्यसीतरं ६॥

ननु शुद्धबुद्धस्वभावस्यैकरसस्य नित्यमुक्तस्यात्मनो बंधः किंनिबंधनो यस्य निवृत्त्यर्थं विवेकि
नो यत्नं तनु इत्याशंक्य नित्यमुक्तस्यापि प्रातीतिकं बंधहेतुमाह एक इति हे शिष्य सर्वस्य द्रष्टा प्रति
शरीरमेकस्त्वमसि ततश्च व्यापकत्वात्सर्वदा मुक्तप्रायोसि देहाध्यासवशतो बंधे प्रतीयमाने
पि वस्तुगत्या मुक्तोसीत्यर्थः॥ [illegible]

यामतिः सा गतिर्भवेदिति यद्धि प्रसिद्धा किंवदंतीति विरुद्धा न श्रुतिः सत्या अबाधितार्थे तं विद्याकर्म
णी समन्वारभेते पूर्वप्रज्ञा चेति श्रुतिपरिगृहीतत्वात् यं यं वापि स्मरन्भावं इत्यादि स्मृतिपरि
गृहीतत्वाच्च तथा चाभिमानिकावेव बंधमोक्षौ न तु वास्तवाविति अर्थः एवं मुक्तोप्ययमर्थो
दुर्बोधत्वात्पुनः पुनः शिष्यबोधार्थमुच्यते इत्यदोषः॥१०॥ ननु जीवात्मनः पारमार्थिकावे
व बंधमोक्षाविति तत्किं कशंकामपाकर्तुमाह॥ आत्मेति॥ आत्मा च भ्रमात् देहादौ तादात्म्य

आत्मा साक्षी विभुः पूर्ण एको मुक्तश्चिदक्रियः असंगो निःस्पृहः शांतो भ्रमात्संसारवानिव॥
११॥ [illegible] ॥

भ्रमात्संसारवानिव प्रतीयते न तु वस्तुतः संसारी अत्र हेतूनाह साक्षीति कर्त्तुरहंकारादेः
साक्षी न तु कर्त्ता विभुः विविधं भवत्यस्मादिति विभुः सर्वाधिष्ठानं पूर्णो व्यापकः एकः स
जातीयविजातीयस्वगतभेदरहितः मुक्तो वस्तुगत्या मायातत्कार्यातीतः चित्स्वप्रकाशचैत
न्यरूप अक्रियः चेष्टारहितः असंगः सर्वसंबंधशून्यः असंगो ह्ययं पुरुष इति श्रुतेः

अष्टा०
४

[illegible]

ज्ञानदाहे सत्यपि सत्यस्य प्रपंचस्याज्ञानादनिवृत्तेर्वीतशोकः कथं स्यादित्याशंक्य प्रपंचस्य रज्जुभुजं
गवत्कल्पितत्वात् ज्ञानान्निवृत्तौ दुःखहेतोरभावाद्वीतशोकता स्यादेवेत्याह यत्रेति यत्र बोधे इ
दं विश्वं रज्जुसर्पवत्कल्पितं अधिष्ठानाज्ञानकल्पितं भाति स बोधस्त्वं चिदात्मा त्वं सुखं चर यथा
स्वप्नदशायामज्ञानकल्पितं व्याघ्रादिकं जाग्रद्बोधेन निवृत्य सुखं चरति तद्वदित्यर्थः ननु दुःखहेतु

यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत् आनंदपरमानंदः स बोधस्त्वं सुखं चर ९ मुक्ताभि
मानी मुक्तो हि बद्धो बद्धाभिमान्यपि किंवदंतीह सत्येयं या मतिः सा गतिर्भवेत् ॥ १०॥॥
प्रपंचनिवृत्तौ दुःखाभावमात्रं स्यात् सुखं चर कथं स्यादित्याशंक्य स्वभावत एव नित्यानंदस्व
रूपत्वमाह मनुष्यलोकदेवलोकानंदेभ्यः परम उत्कृष्ट आनंदस्त्वमित्यर्थः एतस्यैवानंदस्या
न्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः ९ ननु सर्वं रज्जुसर्पवत्कल्पितं स्वभावतस्त्वानं
दरूपत्वात्मेति चेत्तर्हि बंधमोक्षावात्मनः किंनिबंधनमित्याशंक्याह मुक्ताभिमानीति हि नि
[illegible]
रितिपादितं तत्त्वमत्तमयाकतुमाह निःसंगोऽसीति हे शिष्य त्वं वस्तुतः [illegible]

अष्टा०
२

सि तथा क्रियारहितोऽसि अत्र हेतुमाह स्वप्रकाशो निरंजन इति निष्क्रियस्य समाध्यनुष्ठानं यत् ॥
अयमेव हि निश्चितं ते बंधः तथा च ज्ञानातिरिक्तोपायानुष्ठानमात्रं प्रत्युत बंध एवेत्यर्थः १४॥
तदेवमात्मज्ञानातिरिक्तः समाधिरपि पूर्वं निराकृतः अथ पूर्णोऽसि शुद्धबुद्धात्मनि विपरीतधियमुत्सा
निःसंगो निष्क्रियोऽसि त्वं स्वप्रकाशो निरंजनः अयमेव हि ते बंधः समाधिमनुतिष्ठसि १४ त्वया व्या
प्तमिदं विश्वं त्वयि प्रोतं यथार्थतः शुद्धबुद्धस्वरूपस्त्वं मा गमः क्षुद्रचित्ततां १५॥

र यत्रैव चित्तनिष्ठामुपसंहरति श्लोकद्वयेन त्वयेति हे शिष्य इदं विश्वं त्वया व्याप्तं कनकेनेव कटक
कुंडलादिकं तथा इदं विश्वं त्वयि प्रोतं मृदीव घटशरावादिकं हे शिष्य त्वं यथार्थतः परमार्थतः
शुद्धः अविद्यातत्कार्यप्रपंचातीतः बुद्धः स्वप्रकाशः चिद्रूपोऽसि एवं च सर्वगंधः सर्वरसो नेति नेती
ति चेति श्रुतिद्वयानुसारेणोक्ता भ्रामध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंचतात्कंपं चात्मतत्त्वमुप
दिष्टं भवति हे शिष्य परिपूर्णः शुद्धबुद्धस्वरूपस्तु क्षुद्रचित्ततां विपरीतचित्तवृत्तिं मा गमः मा

अहं परिच्छिन्नो ममेदं देहादिकं सुखी दुःखी चाहमिति भ्रमस्यानादिपरंपरागतस्य सकृद्भावनया निवर्तयि-
तुमशक्यत्वादात्मस्वरूपे निरसकृदुपदेशादिनियासरूत्राच्च पुनःपुनरद्वैतात्मभावनां विजातीयभावना-
निवृत्तिपुरःसरोपायमुपदिशति कूटस्थमिति हे शिष्य आभासोऽहमहंकारोऽहमिति भ्रमं मुक्त्वा वाऽहं भा-
वं ममेदं देहादिकमिति वा बाह्यपदार्थविषयभावं भावनां मुक्त्वा आंतरं भावं सुखी दुःखी मूढोऽहमिति
आंतरपदार्थविषयभावनां मुक्त्वा अकर्त्ता कूटस्थमसंगबोधस्वरूपमद्वैतमात्मानं परिसमंतात्

न

कूटस्थं बोधमद्वैतमात्मानं परिभावय आभासोऽहं भ्रमं मुक्त्वा भावं बाह्यमथांतरं १२ देहाभि-
मानपाशेन चिरं बद्धोऽसि पुत्रक बोधोऽहं ज्ञानखड्गेन तं निष्कृत्य सुखी भव १३॥ छ॥ छ॥

व्यापकभावेनेत्यर्थः १२ अनादिरयं देहाभिमानः सकृद्भावनया न निवर्तते इति पुनःपुन-
र्ज्ञानखड्गेन तं निष्कृत्य सुखी भवेत्याह॥ देहाभिमानेति॥ हे पुत्रक शिष्य त्वं देहेऽहमित्यभिमान-
पाशेन चिरं बहुकालं त्वं बद्धोऽसि अतो बोधोऽहं चिद्रूपोऽहमिति ज्ञानखड्गेन पुनस्तं पाशं निष्कृ-

अष्टा॰ ६

अतस्तं छिद्धि बद्धत्वं संत्यजेत्यर्थः निराकारमात्मतत्त्वं निश्चलं कालत्रयावस्थायि विद्धि सर्वस्मा-
द्भिन्नं नित्यं विज्ञानमानंदं ब्रह्मेति श्रुतेश्च अत एतत्तत्त्वचिन्मात्रउपदेशेन उपदिश्यमाने-
न तत्त्वेन विश्रम्यावस्थाने न पुनर्भवस्य मोहस्य संभवः सिद्धिरित्यर्थः १७ अथ वर्णाश्रमधर्म-

13

अथ संग्रहश्लोकाः साकारमनृतं विद्धि निराकारं तु निश्चलं॥ एतत्तत्त्वोपदेशेन न पुनर्भवसंभवः
१७ यथैवादर्शमध्यस्थे रूपेंऽतः परितस्तु सः तथैवास्मिन्शरीरेंऽतः परितः परमेश्वरः १८॥

कः स्थूलशरीरात् पुण्यापुण्यधर्मकलिंगशरीरादिलक्षणां परिपूर्णचैतन्यसदृष्टांतं निरूपय-
ति यथैवेति यथैवादर्शप्रतिबिंबितशरीरादौ अंतर्मध्ये परितो बहिश्च स आदर्शो व्याप्य वर्तते
तथैव स्वाध्यस्ते अस्मिन्स्थूले शरीरेंऽतः परितश्च परमेश्वरश्चिदात्मा व्याप्य स्थितः तथा च य-
त्र विश्वमिदं भाति कल्पितं रज्जुसर्पवदित्यादि सर्वोऽपि प्रकरणार्थः संक्षेपतः सूचितः १८॥ आ-
दर्शदृष्टांते परिच्छिन्नत्वादिभ्रमापत्तिः स्वाध्यस्तशरीरानवर्तित्ववचनस्याप्यमतो घटाकाशदृष्टां-

शिव॰ ६

प्रतीयमानाः षडूर्मयः षड्भावविकाराश्च त्वत्कृता एवं तु तद्विलक्षणइत्याह निरपेक्षइति हे शिष्य त्वं निरपेक्षः अशनापिपासादिषडूर्मिसंसर्गातीतः तथा निर्विकारः जायते अस्ति विवर्धते विपरिणमते अपक्षीयते नश्यतीत्येवं विधा यास्कादिप्रोक्ताः षड्भावविकारास्तत्संसर्गरहितस्त्वमित्यर्थः तर्हि कीदृशोहमित्यत आह निर्भरइति निर्भरश्चिद्घनरूपः [illegible] शीतलसुखरूपः आमुक्तिसमयमभिव्याप्य शेतेति स्मृतीति शीतलाशयः अगाधा अतुलस्पर्शा अपरिच्छिन्ना बुद्धिः स्वरूपचैतन्यं तद्रूपः अ

निरपेक्षो निर्विकारो निर्भरः शीतलाशयः अगाधबुद्धिरक्षुब्धो भव चिन्मात्रवासनः १६॥

क्षुब्धः अविद्याकृतक्षोभरहितस्त्वं वस्तुतोसि अतस्त्वं क्रियामात्ररहितश्चिन्मात्रनिष्ठो भवेत्यर्थः १६ विषयान्विषवत्त्यजसत्यं पीयूषवद्भजेति मोक्षोपायः प्रथमश्लोके समुपदिष्टः परं तु विषयाणां विषतुल्यत्वे सत्यात्मनः पीयूषतुल्यत्वे च हेतुर्नोक्तः अतस्तत्तु वदन्नेव षोडश श्लोकैः उपदेशमोक्षहेतुस्थितिः... [illegible] २०

मुक्तोस्मीति विवक्षितोर्थः १ एवं कालीनं मोहविडंबनमुक्तं संप्रति गुरुप्रसादान्मम देहात्मविवेकोस्तीति सोपपत्तिकमाह यथेति अहं यथा जगत्प्रकाशयामि तथैव एनं स्थूलदेहं प्रकाशयामि तथा च देहो नात्मा प्रकाश्यत्वात् जगद्वदित्यर्थः कस्तर्हि जगदादिदेहात्मनोः संबंध इत्याशंक्य युक्तिविचारादध्यासिकः संबंधः परमार्थतस्त्वात्मन कश्चित्संबंधः कनक

यथा प्रकाशयाम्येको देहमेनं तथा जगत् अतो मम जगत्सर्वमथवा च न किंचन २ सशरीरमहो विश्वं परित्यज्य मयाधुना कुतश्चित्कौशलादेव परमात्मा विलोक्यते ३ ॥

कुंडलादिवदित्याह अतो ममेति अतो दृश्यत्वात्सर्वं देहप्रमुखं जगत्ममममदीयं मय्यध्यस्तमित्यर्थः चावधारणे अथवा परमार्थविचारे किंचन किमपि देहादिकं मम न चैव मय्यध्यस्तमित्यर्थः तदेवमध्यारोपापवादाभ्यां प्रकृतेः परो बोधोहमित्येवात्र स्फुटीकृतं २ ननु लिंगदेहान्तःकरणादेहाद्यविवेकाभावे कथं प्रकृत्यतिरिक्तात्मबोध इत्याशंक्य ततोपि विवेकजमात्मानुभावमाह सशरीरमिति अहो इत्याश्चर्ये सशरीरं लिंगशरीरकारणसहितं विश्वं परित्यज्य

तैर्बाह्याभ्यंतरं व्याप्तकत्वमाह एकंसर्वगतमिति यथासर्वगतमेकंनित्यंव्योमघटेपटादौवहि रंतश्चवर्त्तते तथानित्यमविनाशीब्रह्मसर्वभूतगणेषुवहिरंतश्चनिरंतरंसर्वदावर्त्ततइत्यर्थः॥ एषतआत्मासर्वस्यांतरमितिश्रुतेः अतश्चबोधोहमितिज्ञानवह्निनादेहाहंभावपाशंनिकृत्यसु

का॰४ खीभवेत्यर्थः॥२०॥ इतिश्रीमहिम्नेश्वरविरचितायामष्टावक्रटीकायामात्मानुभवोपदेशप्रकरणंप्र थमं॥१॥

एकंसर्वगतंव्योमबहिरंतर्यथाघटे नित्यंनिरंतरंब्रह्मसर्वभूतगणेतथा २०॥
अहोनिरंजनःशांतोबोधोहंप्रकृतेःपरः एतावंतमहंकालं मोहेनैवविडंबितः १॥

इत्थंगुरुणाकृपीयुषास्वादानुभवमात्मनः आविष्करोत्सावृष्यंशिष्योनिजगुरुंप्रति १ ताव च्छिष्यश्चिद्रूपात्मानुभवमाविष्कुर्वन्नेवगुरुकृतोपकारख्यापनायप्राचीनसंस्कारवशात् वा धिनानुवृत्त्याप्रतीतस्यमोहविडंबनस्यस्मरणमाविष्करोति अहोइति अहद्दष्टस्याद्भुतस्यानु भवादहोइत्याश्चर्ये अहंनिरंजनःसर्वोपाधिविनिर्मुक्तःशांतःसर्वविकारातीतःप्रकृतेःपरो

यथैवेति यथवदुरसल्कन्नाव्यत्ताशकरानन्नमधुररसेनव्याप्तवसवांपव्याप्तातथवम॥८॥
नंदस्वरूपेलक्षणमध्यस्तविश्वंमयानित्यानंदेननिरंतरंबाह्याभ्यंतरंव्याप्तं तस्माद्विश्वमानंदात्म

अष्टा॰ स्वरूपमेवेत्यर्थः॥ तदेवमस्तिभातिप्रियमित्येवंरूपेणाहमेवसर्वत्रावस्थितइतिश्लोकत्रयवि
८ वक्षितोर्थः ६ विश्वंचेदात्मनोनभिन्नंतर्हिकेनप्रकारेणेदंविश्वंभासतेकेनचकारणेननभा

यथैवेक्षुरसेक्लृप्तानेनव्याप्तैवशर्करा तथाविश्वंमयिक्लृप्तंमयाव्याप्तंनिरंतरं ६ आत्मा ज्ञानाज्ज गद्भाति आत्मज्ञानान्नभासते रज्ज्वज्ञानादहिर्भातितज्ज्ञानाद्भासतेनहि ७॥ ॥ ॥ ॥

सतेइत्याशंक्याह आत्माज्ञानादिति आत्मनोऽज्ञानाज्जगद्भातितथात्मनोऽधिष्ठानस्यज्ञानान्न

भासतेऽधिष्ठानाज्ञानादन्यस्यभानेऽधिष्ठानज्ञानाच्चभानेलोकप्रसिद्धंदृष्टांतमाह रज्ज्वज्ञाना दिति हियथारज्जुस्वरूपस्याज्ञानान्नहिःसर्पोभातितद्वाद्रज्जुज्ञानान्नभासते ७ नन्वा

शिवं॰ ८ त्मनोज्ञानेसतिआत्मप्रकाशाभावाज्जगत्कथमाभासतेइत्याशंक्यस्वरूपंचैतन्यबलादेवेत्याह॥

चार्योपदेशलब्धात्कौशलाच्चातुर्याद्वा परमः श्रेष्ठः आत्मा मयाविलोक्यते नान्यः परमात्मविलो
कनोपाय इत्यर्थः ३ स शरीरं विश्वस्य पृथक्त्वेन या परित्यज्य ते न स दृष्टान्तं निरूपयति यथा न तोयत
इति यथा तरंगाः फेनबुद्बुदाश्च न तोयतो भिन्नास्तदुपादानत्वात्तथात्मविनिर्गतं आत्मनः संजातं
आत्मोपादानकं विश्वं आत्मनो न भिन्नं एवं च तोयतरंगादिषु जलं यथा स्वच्छमनुगतं तथा स्वच्छः
चिद्रूपोहं विश्वस्मिन्नधिष्ठानभूतो न मत्तोऽन्यद्विश्वमित्यर्थः ४

यथा न तोयतो भिन्नास्तरंगाः फेनबुद्बुदाः आत्मनो न तथा भिन्नं विश्वमात्मविनिर्गतं ४ तंतुमा
त्रो भवेदेव पटो यद्वद्विचारितः आत्मतन्मात्रमेवेदं तद्वद्विश्वं विचारितं ॥५॥॥

सदृष्टांतं तेन रूपात्मरूपतया सर्वं लोकं निरूपयति तंतुमात्र इति॥ स्थूलदृष्ट्या तंतुवैलक्षण्येन
प्रतीयमानोपि पटो विचारितो विचारवीक्षितः सन् यद्वत् यथा तंतुमात्रो भवेत् अस्ति तद्वत्तथेदं
स्थूलदृष्ट्या ब्रह्मवैलक्षण्येन प्रतीयमानमिदं विश्वं युक्त्या विचारितं सदात्मतन्मात्रमेव आ
त्मसत्तामात्रकमेव तेन तंतवस्तन्मयाः पटोनुगतस्तथात्मापि सर्वत्र याधिष्ठानभूतो विश्वस्मिन्ननु

मत्तो विनिर्गतमिति इदं विश्वं मत्त एव विनिर्गतं मय्येव लयमेष्यति प्राप्स्यति यथा मृदादौ कुंभा
दिलयस्तद्वदित्यर्थः न चात्र प्रमाणाभाव इति शंकनीयं यतो वा इमानि भूतानि जायंते येन जा
तानि जीवंति यत्प्रयंत्यभिसंविशंतीति श्रुतेः १० ननु ब्रह्म चेज्जगदुपादानकारणं तर्हि तस्य वि
कारित्वान्मृदादिवद्विनाशित्वापत्तिरित्याशंक्याह अहो अहमिति अहो आश्चर्यं चिद्रूपोहं यस्य

अष्टा०
७

मत्तो विनिर्गतं विश्वं मय्येव लयमेष्यति मृदि कुंभो जले वीचिः कनके कटकं यथा॥१०॥
अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे ब्रह्मादिस्तंबपर्यंतं जगन्नाशेपि तिष्ठतः॥११॥॥

मम सर्वोपादानभूतस्यापि विनाशो मम नास्ति न चोपादानत्वे सुवर्णादिवद्विनाशित्वापत्तेः॥ सु
वर्णादिवद्विकारित्वानंगीकारात् विवर्ताधिष्ठानत्वेनैवोपादानत्वस्वीकारात् अत एवाशेष
कार्योपादानत्वाद विनाशिने सर्वोत्कृष्टाय मह्यं नमः ब्रह्मादिदेवताप्रलये विनाशशंकां निराक
रोति ब्रह्मादिरिति ब्रह्मादिस्तंबपर्यंतं यज्जगत्तस्य नाशेपि तिष्ठतः प्रलयेपि स्थितिमतो यस्य मे

प्रकाश इति प्रकाशो नित्यबोधो मे मम निजं स्वाभाविकं स्वरूपमहं ततः प्रकाशादतिरिक्तो भिन्नो
नास्मि अतो मम यदा विश्वं प्रकाशते तदाहं भासे मदात्मकप्रकाशादेव भासते स्वरूपचैतन्यं चेद्भा
सकं तदा कथमज्ञानमिति चेत् मैवं तर्हि स्वरूपचैतन्यमज्ञानविरोधि किं त्वज्ञानसाधकमेवान्य
थाजडस्यासिद्धिरेव न स्यात् किं चात्मस्वरूपप्रकाशाभावे स्वात्मनोप्यसत्त्वप्रसक्तिर्जगदांध्यप्रसंगा

प्रकाशो मे निजं रूपं नातिरिक्तोस्म्यहं ततः यदा प्रकाशते विश्वं तदाहं भास एव हि॥ ८॥ अहो वि
कल्पितं विश्वमज्ञानान्मयि भासते रूप्यं शुक्तौ फणी रज्जौ वारि सूर्यकरे यथा॥ ९ ॥ ॥ ॥

अतस्मात् यदा विश्वं प्रकाशते तदात्मस्वरूपप्रकाशादेवेत्यर्थः ८ स्वप्रकाशेपि मय्यात्मनि अज्ञानव
शाद्विश्वं भासते इति महदाश्चर्यं सदृष्टांतमाह अहो इति स्वप्रकाशेपि मयि अज्ञानाद्विकल्पितं र
चितमध्यस्तं विश्वमपि भासते अहो आश्चर्यमिदं यथा शुक्त्यादौ रूप्यादिकं भासते तद्वदित्यर्थः
॥ ९॥ ननु मायया विकारित्वात्तत्रैव विश्वमुत्पद्यते तत्रैव विलयमेतीति न तु चैतन्यात्मनीति सांख्य

अष्टावक्रगी

[illegible]

अष्टा० १०

नास्ति परमार्थस्य सतो द्वितीयस्यैवाभावात् अथवा यद्वाङ्मनसगोचरं तावत्सर्वं यस्य मे मम संब
धि मिथ्या तादात्म्यसंबंधः सुवर्णकुंडलादिवदित्यर्थः अत एव सर्वसंबंधित्वा सर्वसंबंधित्वाच्च॥
साश्चर्यरूपाय मे मह्यं नम इत्यर्थः १४ ननु त्रिपुटीरूपसंसारस्य पारमार्थिकत्वात्कथं मिथ्या तादा

२१

अहो अहं नमो मह्यं यस्य मे नास्ति किंचन अथवा यस्य मे सर्वं यद्वाङ्मनसगोचरं॥ १४॥ ज्ञानं ज्ञे
यं तथा ज्ञाता त्रितयं नास्ति वास्तवं अज्ञानाद्भाति यत्रेदं सोहमस्मि निरंजनः॥ १५॥

त्म्यसंबंधो जगदात्मनोरित्याशंक्याह ज्ञानमिति ज्ञानं ज्ञेयं तथा ज्ञाता इत्यादिकं त्रितयं त्रिपुटी
रूपं सर्वं वास्तवं पारमार्थिकं नास्ति यत्र मयि इदं त्रितयं अज्ञानादनिर्वचनीयाज्ञानान्मिथ्या
तादात्म्येनाध्यस्तं भाति अत एव वस्तुगत्याहं निरंजनः प्रपंचमलसंबंधशून्योस्मीत्यर्थः॥ १५॥
ननु निरंजनस्य कथं दुःखसंबंध इत्याशंक्य द्वैतभ्रांतिमूलक एवासौ न तु वास्तव इत्याह ॥ ॥

शिव० १०

नन्वात्मा सुखदुःखोच्छेदकदेहवत्त्वान्नानागन्ता तथाहंकाररूपत्वाद्देशगमनागमनवा-
नित्याशंक्याह अहो इति अहो आश्चर्यरूपोऽहं आश्चर्यरूपाय मह्यं नमः आश्चर्यरूपत्वमेवा-
ह एकोऽहमिति नाना सुखदुःखोच्छेदकदेहवानप्यहमेक एव यथा नानासकंपनिष्कंपत्वा-
वच्छेदकजलोपाधिवानपि भानुरेक एवेत्यर्थः क्वचिदिति विश्वं व्याप्य स्थितः परिच्छिन्ना-

अहो अहं नमो मह्यमेकोऽहं देहवानपि क्वचिन्न गंता नागंता व्याप्य विश्वमवस्थितः॥१२॥ अहो
अहं नमो मह्यं दक्षो नास्तीति मत्समः अहंस्पृश्य शरीरेण येन विश्वं चिरं धृतं॥१३॥

हंकारविलक्षणोऽहं क्वचिदपि न गंता कुतोपि नागंता चेत्यर्थः १२ नन्वात्मनो निःसंगः शरी-
रसंसर्गितया जगतस्तद्विधारकत्वादित्याशंक्याह अहो अहमिति प्रथमपदार्थः पूर्ववत्॥
उक्तिकारणान्मत्समो दक्षः असंभाव्यकार्यविधानचतुरः कोपि नास्ति येन हेतुना शरीरेणास्-

फलमित्याशंक्य भ्रांतिनिवृत्तिरेव तत्फलमित्याह अहो मयीति अहो आश्चर्यं मयि स्थितमपि वि-

श्ववस्तुतः कालत्रयेपि मय्यवस्थितमिति विचारतो भ्रांतिरेव शांता ननु परमानंदावाप्तिरेव तन्नि-
ता आत्मनः सर्वदा परमानंदरूपत्वात् कीदृशी भ्रांतिर्निराश्रया उक्तविचारादज्ञानस्य नष्टत्वा-
न्निर्मूलेत्यर्थः १८ नन्वधिष्ठानस्यासोपादानस्य सत्यत्वात् मुक्तेष्वपि प्रपंचोदयः स्यादित्याशंक्याह

अहो मयि स्थितं विश्वं वस्तुतो न मयि स्थितं न मे बंधोस्ति मोक्षो वा भ्रांतिः शांता निराश्रया
१८ सशरीर मिदं विश्वं न किंचिदिति निश्चितं शुद्धश्चिन्मात्र आत्मा च तत्कस्मिन्कल्पनाधुना॥१९॥

सशरीरमिति शरीरसहितमिदं विश्वं न किंचित् न सत्यं नासत्यमिति निश्चितं नेह नानास्ति किंचने-
ति श्रुतेः आत्मा च चिन्मात्रः शुद्धो माया मलशून्य तत्तस्मात्कारणात् अधुना अज्ञाननिवृत्तौ स-
त्यां कस्मिन् अधिष्ठाने विश्वकल्पना स्यात् न कस्मिन्नपीत्यर्थः॥१९॥ ननु सर्वस्य प्रपंचस्यावास्तवत्वेव-
गीजान्याश्रयं शरीरमप्यवास्तवमेवेति शरीरविशेषमधिकृत्य प्रवर्त्तमानं विधिनिषेधशास्त्रमप्यवास्त-
वं स्यात्तथा च तद्बोधितस्वर्गनरकयोरप्यवास्तवत्वात्स्वर्गादावनुरागो नरकादिभ्यश्च भयं न स्यात् किंच

२५

द्वैतमूलमिति अहो आश्चर्ये निरंजनस्याप्यात्मनो द्वैतमूलं दुःखं द्वैतभ्रमो मे त्वियो दुःखोपाध्यासो ननु वास्तवं दुःखमित्यर्थः दुःखोपाध्यासमहाव्याधेः किं भेषजमित्याशंक्याह नान्यदिति अमलो मायातत्कार्यातीतः अस्मिद् पश्चिन्मात्रस्वरूप एकोहमित्येवं प्रतीयमानं सर्वं दृश्यमानं जडजातं तस्मात् मिथ्याभूतं न पारमार्थिकमिति बोधादन्यत्तस्य त्रिविधदुःखव्याधेर्भेषजं नास्तीत्यर्थः॥१६॥ नन्वयं द्वैत

द्वैतमूलमहो दुःखं नान्यत्तस्यास्ति भेषजं दृश्यमेतन्मृषा सर्वमेकोहं चिद्रसोमलः॥१६॥
बोधमात्रोहमज्ञानादुपाधिः कल्पितो मया एवं विमृशतो नित्यं निर्विकल्पे स्थितिर्मम॥१७॥

प्रपंचाध्यासः किं निमित्तः किमुपादानक इत्याशंक्याह बोधेति बोधमात्रश्चिदेकस्वरूपोहमेव पारमार्थिको मया सर्वोपादानभूतेन कर्त्रा अज्ञानादखंडज्ञानस्वरूपान्निमित्तादहंकारप्रमुखोपाधिर्द्वैतप्रपंचः कल्पितः एवं विचारस्य फलमाह एवमिति एवं नित्यं विमृशतो विचारयतो मम

[illegible]

[illegible] ॥ यद्वा [illegible] दानानुरागः स्पंदाने ८
नुभवशालिनो मम संसारस्य प्राणानुबंधः तंत्रा बंधनरूपे जीविते स्पृहा नास्तीत्यर्थः २२ अथ तस्य

अष्टा० सर्वाधिष्ठानत्वं प्रपंचयन्नाह अहो इति अहो इत्याश्चर्ये अनंतमहांभोधौ मयि चित्तवाते समुद्यते सत्
१२ युत्पन्ने सति विचित्रैर्नानाविधैर्भुवनरूपैः कल्लोलैर्भुवनरूपैस्तरंगैर्द्राक् अत्यंत शीघ्रं समुदितं तदुदयालय

॥ अहो भुवनकल्लोलैर्विचित्रैर्द्राक्समुत्थितं मय्यनंतमहांभोधौ चित्तवाते समुद्यते॥२३॥
मय्यनंतमहांभोधौ चित्तवाते प्रशाम्यति अभाग्याज्जीववणिजो जगत्पोतो विनश्वरः॥२४॥

स्वतया वारिधेस्तरंगा इव मत्तो भुवनानि वस्तुतो नित्यानीत्यर्थः॥२३॥ प्रारब्धक्षयदशामनुवदति॥
मयीति अनंतमहांभोधौ सर्वव्यापके चित्समुद्रे मयि चित्तवाते संकल्पविकल्पपयःशालिनि
मनोमारुते प्रशाम्यति सति संकल्पादिरहिते जीववणिजो जीवात्मलक्षणस्य वणिजः कर्तुः अभा शिव०
ग्यात् प्रारब्धक्षयात् जगत्पोतः शरीरादिनौकासमूहो विनाशशीलः विनाशवान्भवतीत्यर्थः १२

शरीरमिति शरीरादिकमेतत्कल्पनामात्रमेव चिदात्मनः सच्चिदानंदरूपस्य मम एतैः शरीरादिभिः नकिमपि कार्यं साध्यं विधिनिषेधादिकं नु अविद्यावंतमेवाधिकृत्य प्रेमा एवमित्यर्थः २० स्वर्गादिभिः किं मे कार्यमिति प्रागुक्तं अथेह लोके चापि कार्यं नास्तीत्याह अहो जनेति अहो इत्याश्चर्ये जनसमूहेपि अरण्यमिव संवृत्तं संजातं तस्मादहं मिथ्यात्वेन क्व रतिं प्रीतिं करवाणि न क्वापीत्यर्थः २१ ननु

शरीरं स्वर्गनरकौ बंधमोक्षौ भयं तथा कल्पनामात्रमेवैतत्किं मे कार्यं चिदात्मनः २० अहो जनसमूहेपि न द्वैतं पश्यतो मम अरण्यमिव संवृत्तं क्व रतिं करवाण्यहं २१ नाहं देहो न मे देहो जीवो नाहमहं हि चित् अयमेव हि मे बंध आसीद्या जीविते स्पृहा २२ ॥

शरीरस्याहं ममतास्पदतयानुरागविषयत्वादहंकारस्याप्यहंतास्पदतयानुरागविषयत्वात्तत्र स्पृहा स्यादित्याशंक्याह नाहमिति देहोहं जडत्वान्नापि मे देहो ममतिः संगत्वाज्जीवोहंकारी नाहं कर्तृत्वात् आत्मनश्चाकर्तृत्वात्कस्तर्हि त्वं इत्याशंक्याह अहंहि चिदिति चित्स्वरूप एवाहमित्यर्थः कुतस्तर्हि वि

अविनाशिनमिति हे शिष्य अविनाशिनं त्रैकालिकसत्ताशालिनं कालतोवस्तुतो

अ॰ गी॰ टी॰ देशतो वा वच्छेदशून्यं एकं वस्तुतो व्यवच्छेदशून्यं चित्स्वरूपं विज्ञाय निदिध्यासनतत्त्वतः आत्मज्ञ

१३ स्य अत एव धीरस्य तव अर्थार्जने व्यवहारिकार्थसंग्रहे कथं रतिः प्रीतिर्लक्ष्यते इत्याक्षेपः ॥१॥

ननु ज्ञाने सति विषयसंग्रहः कथमनुपपन्न इत्याशंक्य विषयप्रीतेरात्माज्ञानमूलत्वं सदृष्टांतं

अविनाशिनमात्मानमेकं विज्ञाय तत्त्वतः तवात्मज्ञस्य धीरस्य कथमर्थार्जने रतिः ॥

॥ १ ॥ आत्माज्ञानादहो प्रीतिर्विषयभ्रमगोचरे शुक्तेरज्ञानतो लोभो यथा रजतविभ्रमे ॥ २ ॥

सोपपत्तिकमाह आत्माज्ञानादिति अहो इति संबोधने हे शिष्य विषयभ्रमगोचरे विषये या प्रीतिः सा आत्माज्ञानादेव भवति तत्त्वनाशात् नष्टा तिरिक्तविषयाणां बाधादिति भावः अत्र लोकप्रसिद्धं दृष्टांतमाह शुक्तेरिति यथा रजतविभ्रमे सति शुक्तेरज्ञानतो लोभः पामराणामपनुभवसाक्षिक इत्यर्थः विषयभ्रमगोचर इत्यत्र विशेषणस्यापि पूर्वनिपातो विशेषणविशेष्ययोर्बहुलमित्यत्र बहुलग्रहणात् आत्मज्ञस्येव तत् आत्माज्ञाननत इति पदं विषयभ्रमगोचर इत्यनेन प्रीति

अष्टावक्रगीता ४

१३

अयबाधितानुवृत्त्या स्वस्मिन्सर्वजीवव्यवहारं पश्यन्नाह मयीति आश्चर्यं यन्निष्क्रिये निर्विकारे मयि अ
नंतमहांभोधौ जीवा एव वीचयस्तरंगा उद्यंति अभिव्यक्ता भवंति च मिथः परस्परं घ्नंति ताडयंति इव
शत्रुभावाध्यासात् अन्ये च मिथः खेलंति मित्रभावाध्यासात् अविद्याकामकर्मनाशे सति च मयि विशं
ति च कस्मात्स्वभावतः अविद्याकामकर्मस्वभाववशात् उत्पत्त्यादिकं प्राप्नुवंति स्वभावतः स्वस्य चिद्

मय्यनंतमहांभोधावाश्चर्यं जीववीचयः उद्यंति घ्नंति खेलंति प्रविशंति स्वभावतः॥२५॥

इत्यष्टावक्रे द्वितीयं प्रकरणं

पस्य ग्रंथशरीरेण स्वभावत स्तत्रैव प्रविशंति घटाकाशादय इव महाकाशे इति विवेकः॥२५॥ द्वि
तीयेस्मिन्प्रकरणे शिष्येणात्मानुभवस्थितिः निवेदिता गुरोस्तुष्ट्यै वक्राश्चर्यपुरस्सरा॥१॥ इति श्री
महेश्वरविरचितायामष्टावक्रटीकायां शिष्येणोक्तमात्मानुभवोल्लासपंचविंशतिकं द्वितीयं
प्रकरणं॥२॥ शिष्यानुभवपरीक्षेज्ञानेपि करुणावशात् नहि ज्ञानपरीक्षार्थं शिष्यमाह गुरुः

अष्टा०
१४

सर्वभूतेष्वात्मानं सर्वभूतेषु ब्रह्मादिस्थावरांतेषु आत्मानमधिष्ठानभूतं जानतः सर्वभूतानि चात्म
नि रज्जौ भुजंगादिवत् अध्यस्तानि जानतो मुनेर्विषयेषु ममत्वमनुवर्तत इति आश्चर्यं अत्रं भावो नहि शुक्ति
कायां मध्यस्तं रजतमिति जानतः तत्र ममत्वं संभवतीति भावः॥५॥ आस्थित इति परं सजातीयविजा
तीयस्वगतभेदशून्यमद्वैतमास्थितः साक्षादनुभवन्नतथा मोक्षस्वरूपार्थः सच्चिदानंदात्मतत्त्व

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि मुनेर्जानत आश्चर्यं ममत्वमनुवर्तते॥५॥ आस्थितः
परमाद्वैतं मोक्षार्थेपि व्यवस्थितः आश्चर्यं कामवशगो विकलः केलिशिक्षया॥६॥ उद्भूतं ज्ञान
दुर्मित्रमवधार्यातिदुर्बलः आश्चर्यं काममाकांक्षेत्कालमंतमनुश्रितः॥७॥

श्च

व्यवस्थितस्तदेकप्रवणोपि कामवशगः सन् केलिशिक्षया नानाक्रीडाभ्यासेन विकलो दृश्यत इत्याश्च
र्यं॥६॥ उद्भूतमिति। उद्भूतं कामं ज्ञानदुर्मित्रं ज्ञानस्यात्यंतवैरिणं अवधार्य निश्चित्यापि अतिदुर्बलः
अतिशयेन ज्ञानवंशून्य इव ज्ञानी कामविषयमाकांक्षेत् कामं वांछति इदमाश्चर्यं कीदृशः अं
तकालमनुसमीपं श्रितः नहि समीपवर्तिन्यंतकाले सति विवेकिनो विषयतृष्णा युक्तेत्यभिप्रायः॥७॥

ल

शिव०
१४

30

अज्ञानकृता विषयप्रीतिरिति प्रागुक्तं अथ सर्वाधिष्ठानतयात्मनि ज्ञाते सति विषयेषु न पुनः प्रीतिसंभव इत्याह विश्वं स्फुरतीति सागरे तरंगा इव यथा पृथक्सत्तारहितास्तद्वत् यत्रेदं विश्वं पृथक्सत्तारहितं स्फुरति स एव त्वदात्माहमस्मीति विज्ञाय साक्षात्कृत्य दीन इव मम इदं भवत्विति तस्माकुलत्वद्धि किं धावसि कथं धावसीत्याक्षेपः॥ ३॥ न देवं श्लोकत्रयेणाज्ञानिनिशिष्टा दृश्यमानं विषयम्

विश्वं स्फुरति यत्रेदं तरंगा इव सागरे। सोऽहमस्मीति विज्ञाय किं दीन इव धावसि॥ ३॥ श्रुत्वापि शुद्धचैतन्यमात्मानमतिसुन्दरम्। उपस्थेऽत्यन्तसंसक्तो मालिन्यमधिगच्छति॥ ४॥

व्यवहारमात्रेऽपीदानीं सर्वज्ञानिषु विषयं व्यवहारं शिक्षयितुं वार्थं गुरुरुपदिशति श्रुत्वापीति शुद्धचैतन्यं श्रुत्वापि गुरुमुखाद्वेदान्तवाक्यतः साक्षात्कृत्वापि उपस्थे समीपस्थे विषये अत्यन्तसंसक्तः सन् आत्मज्ञः कथं मालिन्यं बोधाभावमधिगच्छति प्राप्नोति अस्य प्रकरणस्य शिष्यजिज्ञासार्थमाक्षेपमुद्रये वप्रहतत्वाय त्वाक्षेपवाचकं पदं न दृश्यते तत्र दध्याहर्तव्यं ४ पुनरप्याश्चर्यमुद्भावयति॥॥ ॥

आत्मानमसक्तो न इति १ ननु संसारव्यवहारस्थो ज्ञानी कथं न संसरति तुल्यत्वादित्याशंकाह धीरस्तु हि तत्त्वानन्दावेक्षणमाह यत्पदेति अहो इति संबोधने हे गुरो यत्पदं अहो आत्मस्वरूपं शक्राद्याः सर्वे देवताः पि दीनाः दैन्यभावाः यत्पदं प्राप्तुमिच्छन्तो दीनाः तत्पदप्राप्तितः शोच्याः वर्तन्ते तत्र आत्मस्वरूपे पदे स्थितः तत्स्वपदार्थैक्येन वर्तमानोऽपि योगी लब्धसाक्षात्कारो विषयलाभान्न हर्षं प्राप्नोति नापि तदपगमाद्दुःखी भवतीत्यर्थः २

31

यत्पदं प्रेप्सवो दीनाः शक्राद्याः सर्वदेवताः। अहो तत्र स्थितो योगी न हर्षमुपगच्छति॥ २॥
तज्ज्ञस्य पुण्यपापाभ्यां स्पर्शो ह्यन्तर्न जायते। न ह्याकाशस्य धूमेन दृश्यमानापि संगतिः॥ ३॥

मू० ३

तज्ज्ञस्य विधाकिंकरत्वं वक्तुं पुण्यापुण्यसंस्पर्शमाह॥ तज्ज्ञस्येति तत्त्वपदार्थैक्याभिज्ञस्य पुण्यपापाभ्यां सह अन्तःकरणधर्माणां स्पर्शः संबंधो न जायते॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति स्मृतेः॥ अत्र दृष्टान्तमाह नहीति यथा हि आकाशस्य धूमेन सह दृश्यमानापि संगतिर्नास्ति तथात्मज्ञस्य न पुण्यादिसंगतिरित्यर्थः ३ ननु कर्मणि कृते कथं न पुण्यादिसंस्पर्श इत्याशंक्याह ज्ञानिनो वि

अंतस्त्यक्तेति अंतःकरणात्त्यक्ताः कषाया विषयवासना येन तस्य निर्द्वंद्वस्य शीतोष्णादिसमचित्तस्यस्य अत एव निराशिषो विषयवासनाविहीनस्य यदृच्छया दैवयोगात् आगतः प्राप्तो भोगो भुज्यमानो विषयो दुःखाय न भवति तुष्टये च न भवति १४ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामाक्षेपद्वारोपदेशचतुर्दशकं नाम तृतीयं प्रकरणं ३ ॥ गुरोरेवमुपालिप्तः शिष्यो ज्ञानदृशा स्वसन् ॥ ज्ञाति

32

अंतस्त्यक्तकषायस्य निर्द्वंद्वस्य निराशिषः यदृच्छयागतो भोगो न दुःखाय न तुष्टये १४ ॥

इत्याक्षेपद्वारोपदेशचतुर्दशकं ३ ॥ हंतात्मज्ञस्य धीरस्य खेलतो भोगलीलया ॥ न हि संसारवाहीकैर्मूढैः सह समानता ॥ १ ॥

त्मबोधचेष्टानां स्वष्टमा च हृत्संभवं १ एवं तावद्गुरुणा परीक्षार्थमाक्षिप्तः शिष्यः प्रारब्धवशाद्बाधितानुवृत्त्या ज्ञानिनोपि सर्वव्यवहाराणामुपपत्तिमात्मज्ञानोहत्या सवशादेवाह षड्भिः श्लोकैः ॥ हंतेति ॥ हंतेत्यात्मज्ञानोल्लसितेन हर्षे हे गुरो आत्मज्ञस्य सर्वाधिष्ठानतयात्मानं जानतः अत एव धीरस्य विषयैर्विक्षिप्तचित्तस्य भोगलीलया [illegible] लीलया क्रीडया प्रारब्धवशात्

यारसंन्यस्तानुसंधानस्य [illegible] मायामात्रमिति इदं दृश्यमानं विश्वं मायामात्रं कादिवद्रूपं पश्यन् ... अत एव कुत इदं शरीरादिकं जायते कुत्र च विलयं याति एवं रूपं कौतुकं रहितस्तस्याधीरः स्वयं नृपादचला धीर्यस्य सः संनिहितेपि मृत्यौ सत्यपि सकथं त्रस्यतीत्याक्षेपः ॥ ११ ॥ सर्वैषामाक्षेपाणां समर्थनार्थं ज्ञानिनो निरूपत्वमाह । निःस्पृहमिति । यस्य ने

अष्टा० १५

मायामात्रमिदं विश्वं पश्यन्विगतकौतुकः ॥ अपि संनिहिते मृत्यौ कथं त्रस्यति धीरधीः ॥ ११ ॥
निःस्पृहं मानसं यस्य नैराश्येपि महात्मनः ॥ तस्यात्मज्ञानतृप्तस्य तुलना केन जायते ॥ १२ ॥ न २
स्वभावादेव जानानो दृश्यमेतन्न किंचन ॥ इदं ग्राह्यमिदं त्याज्यं स किं पश्यति धीरधीः ॥ १३ ॥ दं ३

33

राश्येमोक्षेपि मानसं निःस्पृहं तस्य आत्मज्ञानतृप्तस्य ब्रह्माहमस्मीति ज्ञानवतः समाप्तसर्वमनोरथस्य केन समं तुलना जायते न केनापीत्यर्थः १२ ज्ञानिनो हानोपादानादिव्यवहारमाक्षिपति । स्वभावादि ॥ ति ॥ प्रपंचो मिथ्या दृश्यत्वात् शुक्तिकारजतवदित्यनुमानादेतत् दृश्यं न किंचन सत्तनास्मदिति जानतो निश्चित्य यो धीरधीः स इदं ग्राह्यमिदं त्याज्यमिति कथं पश्यतीत्याक्षेपः १३ अत्र हेतुमाह ॥ ॥

शिव० १५

३४

त्र्द्देति ऐहिकामुष्मिकभोगविरक्तस्य नित्यमात्मतत्त्वमनित्यं शरीरादिकं जानतो विवेकिनो मोक्षः सच्चिदानं
दस्तत्र कामोंतःकरणं यस्य एवंविधस्य ज्ञानिनोपि मोक्षादेव असद्रूपतनुधनवियोगादेव विभीषिका षि
भयं दृश्यते न हि स्वप्नदृष्टतनुधनविनाशेपि जाग्रतो भयं कदापि दृष्टमिति भावः॥ ८॥ एवमाक्षेपमुद्
याष्टवेमुक्तं। अथ ज्ञानिनस्तोषरोषावप्यचिन्ताविति कं ढेनो निरूपयति धीरइति धीरो ज्ञानी लोके विष

इहामुत्रविरक्तस्य नित्यानित्यविवेकिनः आश्चर्यं मोक्षकामस्य मोक्षादेव विभीषिका॥ ८॥ धीरस्तु
भोज्यमानोपि पीड्यमानोपि सर्वदा। आत्मानं केवलं पश्यन्न तुष्यति न कुप्यति॥ ९॥ चेष्टमानं शरीरं
स्वं पश्यत्यन्यशरीरवत्। संस्तवे चापि निंदायां कथं क्षुभ्येन्महाशयः॥ १०॥

यान्नोज्यमानोपि तथा निंदादिना पीड्यमानोपि सर्वदा आत्मानं केवलं सुखदुःखादिरहितं पश्यन्न तुष्यति
न च कुप्यति तोषरोषहेतूनां केवलात्मनि असंभवज्ञानादित्यर्थः ९ किंच तोषरोषहेतूनां स्तुतिनिंदादी
नां शरीरधर्मत्वात् शरीरस्य चात्मभिन्नत्वेनानुसंधानात् ज्ञानिनस्तोषरोषावित्याह चेष्टमानमिति॥
चेष्टमानं स्वं शरीरं आत्मभिन्नं पश्यन् अन्यशरीरवत् इति यः पश्यति स महाशयः संस्तवे निंदायां तावपि

[illegible]

नस्यादाशो आत्मानं चयदा थं मद्वयं अभिन्नं जानाति भयहेतुप्रारब्धवशाद्बाधितानुवृत्तिदेकं नत्वमिति

३५

अष्टा० मन्यते तत्क्वेति एवं कुर्वतस्तस्य कुत्रचिदिह वा अमुत्र वा भयं नास्ति भयहेतो द्वैतज्ञानबाधितत्वादि
१७ क्रे ति भावः ८ इत्यष्टावक्रमुनिविरचिते अध्यात्मशास्त्रे शिष्यप्रोक्तानुभवोल्लासषट्कविवरणं नाम चतुर्थं प्र
करणं ४॥ एवमुल्लासषट्केन स्वशिष्येण विपरीतिते गुरुर्दृढोपदेशार्थं लययोगमष्टावक्रोब्रवीत् १॥

५ आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरं। यद्वेत्ति तत्स कुरुते न भयं तस्य कुत्रचित्॥ ८॥ इत्युल्लासषट्कं॥
न ते संगोस्ति केनापि किं शुद्धस्त्यक्तुमिच्छसि। संघातविलयं कुर्वन्नेवमेव लयं व्रज॥ १॥

एवमुल्लासषट्केन शिष्ये परीक्षिते सति पुनर्दृढोपदेशार्थमाचार्यो लयमुपदिशति श्लोकचतुष्टयेन॥ ॥ शिव०
न त इति हे शिष्य शुद्धबुद्धस्वभावस्य तव केनापि देहगेहादिना अहंकारममकारास्पदेन न संगोस्ति अतः शुद्ध १७
वे असंगस्त्वं किं त्यक्तुं किमुपादातुमिच्छसि तस्मात्संघातस्य देहस्य विलयं कुर्वन्नहं देह इति॥ निरसनं कुर्वन्न
वमेव देहादिनिरसनरूपमेव लयं व्रज॥ १॥ राम कृष्ण शिव हरे राम कृष्ण राम कृष्ण कृष्ण राम कृष्ण कृष्ण

आत्मैवेति येन महात्मना इदं दृश्यमानं सर्वं जगत् आत्मैवेति ज्ञातं तेन ज्ञानिना यदृच्छया प्रारब्धवशादेवर्तमानं वाचनकलापो निषेद्धुं प्रवर्तयितुं वा तमः समर्थो न कोपीत्यर्थः॥ तदुक्तं शारीरकभाष्ये॥ अविद्यावद्विषयोवेदइति प्रबोधनीय एवासौ सुप्तो राजेव वंदिभिरिति स्मृतिरपि॥४॥ ननु ज्ञानिनोपि यदृच्छया प्रवर्तनं तेन किं निषेद्धुं एव इच्छानिषेधो निवर्तयितुमशक्यत्वादित्याशंक्याह आब्रह्मेति यद्यपि ब्रह्मणामारभ्य स्तंभपर्यंतं मिथ्या निषेधे विवर्जयितुमशक्यो तथापि विज्ञस्यैवेच्छाद्वेषनिवर्तने सामर्थ्यमस्तीत्यर्थः॥

आत्मैवेदं जगत्सर्वं ज्ञातं येन महात्मना॥ यदृच्छया वर्तमानं तं निषेद्धुं क्षमेत कः॥४॥ आब्रह्मस्तंभपर्यंते भूतग्रामे चतुर्विधे विज्ञस्यैव हि सामर्थ्यमिच्छानिच्छाविवर्जने॥ ५ ॥

या प्रवर्तमानो ज्ञानी न विधिनियमइत्यर्थः ५ अद्वैतज्ञानेन द्वैतज्ञानस्य बाधितत्वात् ज्ञानिनां भयहेतुः कापि नास्तीत्युपसंहरति॥॥ ॥ ॥ ॥ ॥ छ छ छ छ छ रामरा

तदा बंधः॥ यदा चित्तं न वांछति न शोचति न मुंचति न गृह्णाति न हृष्यति न कुप्यति तदा मुक्तिः। यदा चित्तं सक्तं काश्वपि दृष्टिषु तदा बंधः॥ यदा चित्तमसक्तं सर्वदृष्टिषु तदा मोक्षः इत्यर्थः॥२॥ आत्मतु बाधितानुवृत्त्या दृश्यमानाः सर्वा अपि विषयदृष्टिस्तथा यदाहंकारनिवृत्तो मोक्षः तदा ते विषया इति वदन्ते वशिष्ठादयः। मर्यमध्यमेनं दितुमनुवदति॥ यदा नाहमिति॥ यदाहमित्यवस्था अध्यासोऽनर्थमूलभूतो निवर्तते तदा मोक्षः यदा च सोनुवर्तते तदा बंधनमिति॥

अष्टा० २०

तदा बंधो यदा चित्तं सक्तं काश्वपि दृष्टिषु॥ तदा मुक्तिर्यदा चित्तमसक्तं सर्वदृष्टिषु॥३॥ यदा नाहं तदा मोक्षो यदाहं बंधनं तदा॥ मत्वेति हेलया किंचिन्मा गृहाण विमुंच मा॥४॥ इति बंधमोक्षचतुष्कं नाष्टमं प्रकरणं॥ ८॥

ज्ञात्वा हेलया नायासेनैव हेयोपादानादिक्रियाणामकर्तात्वमसि अकर्तात्मज्ञानेन कर्तृत्वाभिमानोच्छेदादिति भावः॥४॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां गुरुप्रोक्तं बंधमोक्षव्यवस्थाप्रकरणमष्टमं॥ ८॥ शिष्योक्तानुभवस्यैव दार्ढ्यार्थं गुरुणोच्यते॥ निर्वेदस्याष्टमेऽस्मिन्विरक्तौ त्यजनात्मकः॥१॥ मत्वेति हेलया किंचिन्मा गृहाण विमुंचेति यदुक्तं तत्र किं द्वारमित्यपेक्षायां गुरुरनुमोदनमुद्

॥ अष्टावक्रगीताटीका ॥

38

अहो इति॥ अहो इत्याश्चर्ये नूपमलौकिकं चिन्मात्रं चैतन्यमात्रमेवाहं जगत्सर्वं प्रपंचजातं इंद्रजालोप
मं दर्शनकाले पृथक्सत्तारहितं॥ अतो विश्वस्य पृथक्सत्तारहितत्वान्मम कुत्र वस्तुनि कथं केन कारणेन हेयो
पादेयबुद्धिः स्यान्न कुत्रापीत्यर्थः॥५॥ इति श्रीमहिश्वेश्वरविरचितायामष्टावक्रटीकायामनुभवपंच
कविवरणं सप्तमं प्रकरणं॥७॥ इत्थं परीक्षितज्ञानं शिष्यमेवाभिनंदितुं॥ गुरुर्बंधस्य मोक्षस्य व्यवस्थां सम्य

अहो चिन्मात्रमेवाहमिंद्रजालोपमं जगत्॥ अतो मम कथं कुत्र हेयोपादेयकल्पना॥५॥ इत्य
नुभवपंचकं॥ तदा बंधो यदा चित्तं किंचिद्वांछति शोचति॥ किंचिन्मुंचति गृह्णाति किंचिद्धृ
ष्यति कुप्यति॥१॥ तदा मुक्तिर्यदा चित्तं न वांछति न शोचति॥ न मुंचति न गृह्णाति न हृष्यति न कुप्यति॥२॥

ग्वदीत्॥ तदेवं सप्तभिः प्रकरणैः स्वशिष्यं सम्यक्परीक्ष्य बंधमोक्षव्यवस्थानिरूपणव्याजेन गुरुः स्वशिष्या
नुभवमभिनंदति॥ चतुर्भिः श्लोकैः॥ तदेति॥ हे शिष्य अतो मम कथं कुत्र हेयोपादेयकल्पना इत्यंते यत्त्वयोक्तं
तत्तथैव॥ यत्तच्चित्तं यदा वांछादिविकारवद्भवति तदैव जीवस्य बंध इत्यर्थः॥१॥ तदा मुक्तिरिति॥ यदा चित्तं
[illegible]

मय्यनंतेति॥ मयि आत्मनि अनंते विनाशरहिते महति व्यापके अंभोधौ समुद्रे जगदाख्यवीचीः स्वभावतः
दृश्यत्वादिस्वभावादुदेतु च अपरमस्तमायातु मम तु न तदुदये वृद्धिर्नास्ति व्यापकत्वात्तदपरमे च क्षति
र्नास्ति अनंतत्वादित्यर्थः॥२॥ पूर्वं दृष्टांतेनात्मनो जगदधिकार इति भ्रमः स्यात्तद्वारणार्थमाह॥ मयीति॥
मयि अनंते महांभोधौ नाम प्रसिद्धं विश्वं कल्पनामात्रमेव न तु तात्त्विकं॥ अतः कारणादहमतिशांतः॥३॥

अष्टा०
१९

39

मय्यनंतमहांभोधौ जगद्वीचीः स्वभावतः॥ उदेतु वास्तमायातु न मे वृद्धिर्न च क्षतिः॥२॥ मय्यनंत
महांभोधौ विश्वं नाम विकल्पना॥ अतिशांतो निराकार एतदेवाहमास्थितः॥३॥ नात्मा भावे
षु नो भावस्तत्रानंते निरंजने॥ इत्यसक्तोऽस्पृहः शांत एतदेवाहमास्थितः॥४॥

प्रपंचोपप्लवरहितः॥ अत्र हेतुमाह॥ निराकार इति॥ एतदात्मज्ञानमेव अहमास्थितः आश्रितो न तु लय
योगं तस्य पूर्वमेव दूषितत्वात्॥३॥ अतिशांतत्वं स्पष्टयति॥ नात्मेति॥ आत्मा भावेषु देहादिषु आदेयतया
नास्ति व्यापकत्वात् भावो देहादिस्तत्रात्मनि नास्ति निरंजनत्वात् इति कारणादहमसक्तः संसर्गरहितो
ऽत एवास्पृहः इच्छादिधर्मासंश्लिष्टोऽतः शांत इत्यर्थः॥४॥ इच्छादिरहितत्वे हेत्वंतरमप्याह॥ ॥ ॥

१९

शुक्तिदृष्टान्तेनात्मनि परिच्छिन्नत्वशंकास्यान्नेत्याहेत्यर्थमाह अहमिति अहं वा अहमेव सर्वभूतेषु अ
नुगतिप्राकृतिकेषु सन्नात्मरूपत्वादिपदत्वेनास्मि अतो हेतोः सर्वभूतान्यधिष्ठानभूते मयि वर्तन्त इति ज्ञानं
वेदान्तसिद्धं॥ तथा सत्येतस्यात्मनस्त्यागादिकं न संभवतीत्यर्थः ४॥ इति श्रीमद्विश्वेश्वरविरचितायाम
ष्टावक्रटीकायां शिष्यप्रोक्तमुत्तरचतुष्टयं नाम षष्ठं प्रकरणं॥६॥ ननु लययोगाभावे संसारविक्षेपानिरं

५०

अहं वा सर्वभूतेषु सर्वभूतान्यथो मयि इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ४ इत्यष्टावक्रे
शिष्यप्रोक्तमुत्तरचतुष्टयं षष्ठं प्रकरणं ६ मय्यनन्तमहाम्भोधौ विश्वपोत इतस्ततः भ्रमति स्वान्त
वातेन न ममास्त्यसहिष्णुता॥१॥

ष

कुशप्रसरः स्यादित्याशंक्य तस्या निवृत्त्याभावमनुभवपंचकेनोत्तरमाह शिष्यः लययोगाननुष्ठानेप्य
वहारे निरंकुशे॥ आशंक्या शिष्यः सोऽहंत्रासादब्रवीद्गुरुमुत्तरं मयीति मय्यात्मनि अनन्ते महासमुद्रे वि
श्वाख्यः पोतः नौका स्वान्तवातेन मनः पवनेन इतस्ततो भ्रमति अत्र मम असहिष्णुता असहनता नास्ति
समुद्रस्येव नौकापरिभ्रमणेनेत्यर्थः॥१॥ जगद्व्यवहारस्यानिवृत्त्याभावः पूर्वमुक्तः अथ जगदुदयाप
[illegible] लययोगमनुपादिश्य [illegible] लया
यभावोपपादकं आत्मज्ञानमनुवदन्नेव शिष्यः पूर्णात्मनो लयाद्यसंभवमाह चतुर्भिः श्लोकैः॥ आ
काशवदिति॥ अहमात्मा आकाशवदनन्तः ननु अनन्तस्यात्मनो देहादिनिवासः कथमित्यत आह॥ घट
वदिति॥ प्राकृतं प्रकृतिकार्यं जगत् देहादिकं घटवत् तथा चात्मनो देहादिरेकदेशावच्छेदक एव योग्य

अष्टा०
१८

५१

व

आकाशवदनन्तोऽहं घटवत्प्राकृतं जगत् इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः॥१॥ महोद
धिरिवाहं स प्रपंचो वीचिसन्निभः इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः॥२॥ अहं स शुक्ति
संकाशो रूप्यवद्विश्वकल्पना इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः॥३॥
श्व

इव घटादित्यर्थः अत्र प्रमाणमाह इतीति इत्येवं वेदान्तसिद्धं ज्ञानमतोऽत्र नान्यथाभावशंकेत्यर्थः॥ तथे
ति॥ तथा सत्यात्मनोऽनन्तत्वे सत्येतस्यात्मनः त्यागो ग्रहणं लयश्च न संभवति॥ परिच्छिन्नस्यैव घटादेस्त्या
गादिदर्शनादित्यर्थः १ घटाकाशदृष्टान्ते देहात्मनोर्भेदशंकास्यादित्यपरितोषादाह॥ महोदधिरिति॥ स्प
ष्टं॥२॥ समुद्रवीचिदृष्टान्ते देहात्मनोर्विकारविकारित्वशंकास्यादित्यपरितोषादाह॥ अहं स इति॥ स्पष्टं॥३॥

शिव०
१८

उदेतीति हे शिष्य भवतः सकाशाद्विश्वमुदेति भवदभिन्नं च॥ यथा वारिधेः सकाशात् बुद्बुदो वारिधेरभि
न्न एवोदेति इत्येवंप्रकारेण एकं सजातीयादिभेदरहितमात्मानं ज्ञात्वा एवमेव एकात्मज्ञानमेव लयं
व्रज २ ननु प्रत्यक्षतो भिन्नतया हारसर्पादिभेदप्रतीयमाने कथं हारादिविलय इत्यत आह प्रत्यक्षमि
ति॥ प्रत्यक्षमपीदं व्यक्तं विश्वममले त्वयि नास्त्येव अवस्तुत्वाद्रज्जुभुजंगवत्तस्मादेवमेव लयं व्रजेति हि

उदेति भवतो विश्वं वारिधेरिव बुद्बुदः॥ इति ज्ञात्वैकमात्मानमेवमेव लयं व्रज॥२॥ प्रत्यक्षमप्यवस्तु
त्वाद्विश्वं नास्त्यमले त्वयि रज्जुसर्प इव व्यक्तमेवमेव लयं व्रज ३ समदुःखसुखः पूर्ण आशानैरा
श्ययोः समः समजीवितमृत्युः सन्नेवमेव लयं व्रज ४ इति लयचतुष्कं ५॥

तीयस्य हेयोपादेयस्याभावादित्यर्थः ३ समेति पूर्ण आत्मानंदपूर्णस्त्वमत एव दैववशादुपस्थितयोः॥
सुखदुःखयोः समः इच्छानिवृत्त्योश्च समस्तथा जीवितमृत्योश्च समो निर्विकारः सुखदुःखादीनामनात्म
धर्मत्वात् [illegible] इत्यर्थः ४॥ इति श्रीमहि[illegible] विरचि

अष्टा०
२१

हेयं एवं कृतमनया नेवादेत्यो यमिति निश्चितः ज्ञानी शाम्यति कुत्रापि इच्छां न कुरुते॥३॥ हे द्वन्द्वानामारब्ध
कर्मवशात् [illegible] भाविनां इच्छानिवृत्तिं विहाय यथाप्राप्तभोगी मुक्तिमाप्नुयादित्याह॥ कोऽसाविति॥ यत्र
नृणां द्वन्द्वानि सुखदुःखादीनि न संति असौ कः कालः किं वा बाल्यादि वयो लक्षणा शरीरावस्था अपि तु
न कापीति विचार्य तानि द्वन्द्वान्युपेक्ष्य नत्वेच्छामनिच्छां च कृत्वा यथाप्राप्तेषु अनासक्तः न यावर्ती सिद्धिं मुक्तिं

कोऽसौ कालो वयः किं वा यत्र द्वंद्वानि नो नृणाम्॥ तान्युपेक्ष्य यथाप्राप्तवर्ती सिद्धिमवाप्नुयात्॥४॥
नाना मतं महर्षीणां साधूनां योगिनां तथा॥ दृष्ट्वा निर्वेदमापन्नः को न शाम्यति मानवः॥५॥

अवाप्नुयादित्यर्थः॥४॥ तर्कशास्त्रादिज्ञाने मुनिष्ठानकर्तव्या नानाविप्रतिपत्तिग्रस्तत्वान्नापि कर्मसु ना
पि अष्टांगयोगादिष्वित्याह॥ नाना मतमिति॥ महर्षीणां गौतमजैमिनिप्रभृतीनां मतं नानाविधं अपरिच्छि
न्नं दृष्ट्वा तर्कशास्त्रादिभ्यो निर्वेदमापन्नस्तथा साधूनां कर्मनिष्ठानां मतं नानाविधं॥ केचिद्धोमपराः केचि
ज्जपपराः केचित्कृच्छ्रचान्द्रायणादिपरा इति नानाविधं दृष्ट्वा कर्मभ्यो निर्वेदमापन्नस्तथा योगिनां मतं नाना

शिव०
२१

कृतेति॥ कृताकृते इदं कर्तव्यमिदमकर्त [illegible] व्यमित्यभिनिवेशो द्वंद्वानि सुखदुः
खादीनि कस्य कदा वा शांतानि कस्य वा अपितु न कस्यापि शांतानि॥ एवं ज्ञात्वा इह कृता कृतादिषु निर्वे
दादभिनिवेशादिपरित्यागादेव त्यागपरो भव कीदृशस्त्वं अव्रती नास्ति व्रतं कुत्रापि आग्रहो यस्य सः॥१॥
चिन्न धनेत्यागरूपो निर्वेदस्तु कस्यचिदेव स्यान्न तु सर्वस्येत्याह कस्यापीति हे तात शिष्य सहस्रेषु मध्ये कस्य

कृताकृते च द्वंद्वानि कदा शांतानि कस्य वा॥ एवं ज्ञात्वेह निर्वेदाद्भव त्यागपरोऽव्रती॥१॥ कस्यापि
तात धन्यस्य लोकचेष्टावलोकनात् जीवितेच्छा बुभुक्षा च बुभुत्सोपशमं गताः॥२॥ अनित्यं
सर्वमेवेदं तापत्रितयदूषितं असारं निंदितं हेयमिति निश्चित्य शाम्यति॥३॥

चिदेव धन्यस्यात्यन्तिविनाशरूपलोकचेष्टावलोकनात् जीवितेच्छा भोगेच्छादयः उपशमं गताः॥२॥ इदं तु नाहृश
निर्वेदसंपन्नं शिष्यमानंदयितुमेवोच्यते॥ ननु उपदेशो दृश्यते इति प्रागुक्तमेव॥२॥ ननु ज्ञानिनां सर्वत्रेच्छो
पशमः किं हेतुक इत्यत आह॥ अनित्यमिति॥ इदं दृश्यमानं सर्वं प्रपंचजातमनित्यं चैतन्यः अस्ति तथा एक
सत्वेन गृह्यमाणं नश्वरं आध्यात्मिकाधिदैविकाधिभौतिकतापत्रितयदूषितं अत एव असारं तुच्छं अत एव

इति श्रीमहेश्वरविरचितायामष्टावक्रटीकायां निर्वेदाष्टकविवरणं नवमं प्रकरणं ९ विषयाणामभा
वेऽपि तुष्टिर्निर्वेद इति नः तन्निष्ठाश्च विषयेष्वेव संपद्यत इति दर्शयति १ विषयैर्विनापि संतोषरूपो निर्वेदः प्राग्
क्तः॥ अथेदानीं विषयतृष्णाप्रशमनमभिनंदन्नुद्दर्याय गुरुरुदाहरति॥ विहायेति॥ काममेव वैरिणं ज्ञानशत्रुं वि
हाय तथा अनर्थसंकुलं अर्जनरक्षणादिभिरनेकशो दुःखसंकुलमर्थं विहाय तथा एतयोः कामार्थयो
रनर्थयोर्हेतुं धर्ममपि विहाय सर्वत्र त्रिवर्गहेतुकर्मसु अनादरं उपेक्षां कुरु॥१॥ ननु मित्रक्षेत्रादिफलकेषु

विहाय वैरिणं काममर्थं चानर्थसंकुलं॥ धर्ममप्येतयोर्हेतुं सर्वत्रानादरं कुरु॥१॥ स्वप्नेंद्रजालव
त्पश्य दिनानि त्रीणि पंच वा॥ मित्रक्षेत्रधनागारदारदायादिसंपदः॥२॥ यत्र यत्र भवेत्तृष्णा संसा
रं विद्धि तत्र वा॥ प्रौढवैराग्यमाश्रित्य वीत तृष्णः सुखी भव॥३॥

कर्मसु कथमनादर इत्याशंक्य मित्रादीनामप्यनित्यत्व माह॥ स्वप्नेति॥ हे शिष्य मित्रादिसंपदः स्वप्नेंद्रजालव
त्पश्य यतो दिनानि त्रीणि पंच वा स्थायिन्य इत्यर्थः॥२॥ सर्वत्रानादरं कुर्वित्यनेनोक्तं वैराग्यं पुरुषार्थ
हेतुरित्याह॥ यत्र यत्रेति॥ यत्र यत्र येषु प्रसिद्धेषु विषयेषु तृष्णा भवेत्तमेव संसारं विद्धि विषयतृष्ण
या एव कर्मद्वारा संसारहेतुत्वात् अतः प्रौढवैराग्यं प्राप्तेष्वप्रीत्यभावमाश्रित्य वीततृष्णः अप्राप्तेष्विच्छा
रहितः सन्नात्मनिष्ठया सुखी भवेत्यर्थः॥३॥ अमुमेवार्थं प्रपंचयति॥ तमाह॥ रामरामरामरामरामरामरा

विधं केचिदष्टांगयोगपराः केचिन्महदादिप्रसंख्यानपरा इति नानाविधं दृष्ट्वा अष्टांगयोगादिभ्योपि निर्वेदमा
पन्नः केवलमात्मानुसंधाननिष्ठः को न शाम्यति कः सुखेन प्राप्नोतीत्यर्थः॥५॥ केवलज्ञाननिष्ठामेवाश्रित्य
कर्मादिकं मा कुर्वित्याह॥ कृत्वेति॥ निर्वेदसमतायुक्त्या निर्वेदो नाम विषयानासक्तिस्तथा शत्रुमित्रेषु समा
नता सर्वत्रात्मबुद्धिर्युक्तिर्नाम श्रुत्यनुग्राहकस्तर्कः यतः चेतनस्य सच्चिदानंदस्य मूर्तिपरिज्ञानं स्वरूपसाक्षात्का
रं कृत्वा तदनंतरं नास्ति कश्चिद्गुरुर्यस्य स न किं गुरुः एवंविधो यः संसृतेः सकाशादात्मानं तारयति॥६॥ चेत

कृत्वा मूर्तिपरिज्ञानं चेतनस्य न किं गुरुः निर्वेदसमतायुक्त्या यस्तारयति संसृतेः॥६॥ पश्य भू
तविकारांस्त्वं भूतमात्रान्यथार्थतः तत्क्षणाद्बंधनिर्मुक्तः स्वरूपस्थो भविष्यसि॥७॥ वासना
एव संसार इति सर्वा विमुंचताः॥ तत्त्यागो वासनात्यागात्स्थितिरद्य यथा तथा॥८॥ इति निर्वेदाष्ट
कं नवमप्रकरणं॥९॥

नस्य स्वरूपज्ञानोपायमाह॥ पश्येति॥ हे शिष्य भूतविकारान्देहेंद्रियादीन्यथार्थेन तत्त्वतः भूतमात्रान्पश्य
नतु आत्मस्वरूपान् एवं सति तत्क्षणादहंधनिर्मुक्तः शरीराहंभावनिर्मुक्तः सन्शरीरादिविविक्तात्मस्वरूपस्थो
भविष्यसि॥ शरीरादावनात्मतया ज्ञाते सति तस्याहि भूत आत्मारूढिनिष्ठेय इति भावः॥७॥ नन्वेवमात्म
स्वरूपज्ञाने वासनात्यागादित्याह॥ वासना इति॥ वासना विषयवासना एव संसारः संसारस्य कारणमित्यर्थः॥ अथ अ
निज्ञाने पि तत्र निष्ठा कथं स्यादित्याशंक्य वासनात्यागात् आत्मनि निष्ठा

बुभुक्षापि न कर्तव्येति प्रागुक्तं॥ अथ धर्मार्थकामेष्वपि ज्ञानकार्यत्वमाह॥ अलमिति॥ अर्थादिना अर्थकामधर्मेषु
रुक्ता न कार्यमित्यर्थः॥ अत्रैव हेतुमाह॥ एभ्य इति॥ यत्कारणात्संसारकांतारे संसारलक्षणे दुर्गमे वर्त्मनि भ्राम्यत
मनः एभ्यः अर्थादिभ्यः विश्रांतिं श्रमविच्छेदं नाभूत् नार्थादित्स्मान कर्तव्यमित्यर्थः॥७॥ तस्माद्याउपशमः श्री
गुरुः अशक्तियामानोउपशममाह॥ कृतमिति॥ हे शिष्य आयासदं प्रयासप्रदं अत एव दुःखं कर्म कायादिना
कति जन्मानि न कृतं अपि तु यावदद्य प्राचीनमस्ति तावत्सर्वस्यापि कृतं कर्मणा॥ तु तद्यान अद्य एव लक्षलत्तमा

अलमर्थेन कामेन सुकृतेनापि कर्मणा॥ एभ्यः संसारकांतारे न विश्रांतमभून्मनः॥७॥
कृतं न कति जन्मानि कायेन मनसा गिरा॥ दुःखमायासदं कर्म तदद्याप्युपरम्यतां॥८॥ इत्युप
शमाष्टकं॥१०॥ भावाभावविकारश्च स्वभावादिति निश्चयी॥ निर्विकारो गतक्लेशः सुखेनैवोपशाम्यति॥१॥

तदद्यापि अधुना कर्म भवतु उपरम्यतां॥८॥ इति श्रीमहेश्वरविरचितायामष्टावक्रटीकायां गुरुप्रोक्तमुपश
माष्टकं दशमं प्रकरणं॥१०॥ उक्ता शांतिर्विज्ञानं विना कस्यापि जायते॥ इति निश्चयेन मे वाह गुरु [illegible] र्जीना
मताष्टकं॥१॥ उक्ता शांतिर्विज्ञानादेव स्यान्नान्यथेति बोधयितुं ज्ञानाष्ट [illegible] कमाह॥ तत्रादौ ज्ञानसा
धनमाह॥ भावाभावेति॥ भावाभावरूपो विकारः उत्पत्तिनाशौ यानतः संस्कारादेव जायते न तु निर्विका
रादात्मन इति निश्चयवान्पुरुषो निश्चयबलात्॥ एवं सुखेनैव अनायासेनैव उपशाम्यति॥१॥

48

तस्मात्सात्रेति॥ तस्मात्मात्रत्वरूपएव बंधः कर्मद्वारा बंधहेतुत्वात् तन्नाशस्तस्यानाशएवमोक्षो निवृत्तिहेतु
त्वात् तन्नाशोमोक्षउच्यत्रे हेतुमाह॥ भवेति॥ भवतीति भवो देहादिविषयस्तत्र देहादिसंगाभाव मात्रेण
मुहुर्मुहुर्वारंवारं प्राप्तितुष्टिः आत्मप्राप्तिर्यः संतोषः स्यादतस्तस्यानाशोमोक्षउत्यर्थः॥ प्राप्तितुष्टिरि
तिपाठे प्राप्तिः स्यात्तुष्टिश्च स्यादित्यर्थः॥४॥ ननु बुभुत्सारूपात्तस्याः कथंतत्प्रज्ञेदित्याशंक्याह॥ त्वमेकइति॥

तस्मात्सा तापकोबंधस्तन्नाशोमोक्षउच्यते भवासंसक्तिमात्रेणप्राप्तितुष्टिर्मुहुर्मुहुः॥४॥ त्वमेक
श्चेतनः शुद्धो जडं विश्वमसत्तथा अविद्यापिन किंचित्साकाबुभुत्सा तथापिते॥५॥
राज्यंसुताःकलत्राणि शरीराणि सुखानि च॥ संसक्तस्यापि नष्टानि तव जन्मनि जन्मनि॥६॥

त्रुहजगतित्रयएवपदार्थाः आत्मा जगत् अविद्या च तत्र आत्मातावत्त्वमेवैकश्चेतनः शुद्धोनतुचि
न्दिग्नत्तुतिस्वात्मानमेवैकंपूर्णंज्ञात्वानान्यापुनरात्मबुभुत्सायुक्तानापिजगत् बुभुत्सायुक्ता जगतः अ
सत्वात् जडत्वाच्च नापि अविद्या बुभुत्सायुक्ता तस्या अपिमदसद्विलक्षणरूपानिर्वचनीयत्वात् तथा च तव
बुभुत्सापिकायुक्तानकाचिदपीत्यर्थः॥५॥ जडं विश्वमसदित्युक्तं तद्द्विषयति॥ राज्यमिति॥ राज्यादीनिसर्वा
[illegible] ...पीति तेन विश्वमसदित्यर्थः॥६॥ दृ २

ग

काग्र हृदयइति मध्यमपदलोपी समासः हयिस्सुफलं नकस्यजपादेः कर्मजपादेः प्रीत्यविसयत्वाद्
अष्टा० पादिरूपोविक्षेपोममनास्ति आत्मनश्चाद्दृश्यत्वात् ध्यानाद्यविषयत्वाच्चिंतारूपोपिविक्षेपोम
॥ २५॥ मनास्तीत्यर्थः॥ अतएवमेवस्वरूपेतोवअहमास्थितः॥१॥ ननु तथापि समाध्यर्थोव्यवहारः
कर्तव्यइत्याशंक्यनेत्याह॥ समाध्यासादिति॥ कर्तृत्वं कृत्वाद्यनर्थाध्यासादिनिर्विक्षिप्तोमत्सात
त्रिरसार्थं समाधेय व्यवहारोनान्यथेतिनियमं विलोक्यस्थितोमज्ञानिनिसर्ययमाद्या मो ३

समाध्यासादिविक्षिप्तो व्यवहारः समाधये॥ एवं विलोक्य नियममेवमेवाहमास्थितः
॥ हेयोपादेयविरहादेवं हर्षविषादयोः॥ अभावादद्य हे ब्रह्मन्नेवमेवाहमास्थितः
आश्रमानाश्रमं ध्यानं चित्तस्वीकृतवर्जनात्॥ विकल्पंममवीक्ष्यैतैरेवमेवाहमास्थितः॥४॥

साभावादेवसमाधिशून्यएवाहमास्थितः इत्यर्थः॥३॥ हेयेति॥ पूर्णात्मदर्शिनोममहेयोपादेयवस्तुनोवि
रहात् अतएवमनुनाप्रकारेणहर्षविषादयोरप्यभावात् हेब्रह्मन्नगुरोअद्यअधुनाअहमेव
मेवास्थितइत्यर्थः॥४॥ आश्रमेति॥ आश्रमानाश्रमध्यानं चतथात्मनयुक्तं चित्तस्वीकृतं चित्त
वर्जनं च एतैस्त्रिभिरेवममसंकल्पविकल्पं वीक्ष्यअहमेवमेतत्रितयरहितएवास्थितः॥५॥ रा.म.०
२५॥

49

50

नानाश्चर्यमिदं विश्वं जगत्तु न किंचित्तुच्छवस्तुना शून्यमिति निश्चयी पुरुषो निर्वृत्तवासनः केवलचि
द्रूपः सन्न किंचिदिव विशेषमबाह्यगोचर एव शाम्यति॥ निवृत्तकार्यकारणोपाधिर्भवतीत्यर्थः तत्त्वज्ञा
नेन सर्वस्यापि स्वप्नवन्निवृत्तेरित्यर्थः॥८॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां ज्ञाना
ष्टकविवरणं नामैकादशं प्रकरणं॥११॥ गुरुणोदीरितं ज्ञानं न किंचिदिव शाम्यति॥ तत्त्वमसीत्यभिख्या
नुशिष्यो वदति संप्रति॥१॥ उक्तं ज्ञानाष्टकेन किंचिदिव शाम्यति॥ तदेव शिष्यः स्वस्मिन्विशदयितुमेवमेवा

कायकृत्यासहः पूर्वं ततो वाग्विस्तरासहः॥ अथ चिंतासहस्तस्मादेवमेवाहमास्थितः॥१॥
प्रीत्यभावेन शब्दादेरदृश्यत्वेन चात्मनः॥ विक्षेपैकाग्रहृदय एवमेवाहमास्थितः॥२॥

ष्टकमाह॥ तत्र प्रथमं कायवाङ्मनसां व्यापारोपरममाह॥ कायेति॥ अहं पूर्वमपि कायिकरूपकर्मा
सहस्ततो हेतोर्वाग्विस्तरासहः जपकर्मासहः॥ अथ ध्यानो मनोव्यापाररूपा या चिंता तत्रासहस्तस्माद्धेतोः
एवमेव निर्व्यापार एव अहमास्थितः असामर्थ्ये स्थित इत्यर्थः॥१॥ उक्तव्यापारत्रयोपरमहेतुं वदन्ने
वाक्यमनुवदति॥ प्रीत्यभावेनेति॥ क्वापि सुफलजनकस्य शब्दादेः शब्दकार्यकमिदं यस्य प्रीत्यभावे
[illegible] विविधविक्षेपो [illegible] माह तत्र मेकाग्रहृदयं यस्य सविक्षेप

न तु कुर्वे स्वकार्यं निरायास इत्याशंक्याह॥ चिंतयेति॥ उहद्दुःखं चिंतया जायते नान्यथेति निश्चयी अ
हीणं न एवं च न या चिंतया हीनः अत एव शांतः स्थिरांतःकरणः अत एव सर्वत्र सुखं तत्साधनेयां गलि

25॥ तस्पृहः पुरुषः सुखी भवतीत्यर्थः॥५॥ उक्तसाधनैः सिद्धज्ञानिनां दशां निरूपयति॥ नाहमिति॥ अहं दे
हो न तथा मे देहो न किंतु नित्यबोधोहमिति॥ ज्ञानवशाद्देहादौ निवृत्ताहंममाभिमानो देहादिना कृतम
कृतं च मया कृतमिति न स्मरति॥ यथा कैवल्यविदेहः कैवल्यं प्राप्तः कृताकृतं न स्मरति तद्वदित्यर्थः॥६॥

चिंतया जायते दुःखं नान्यथेहेति निश्चयी॥ तया हीनः सुखी शांतः सर्वत्र गलितस्पृहः॥५॥ नाहं
देहो न मे देहो बोधोहमिति निश्चयी॥ कैवल्यमिव संप्राप्तो न स्मरत्यकृतं कृतं॥६॥ आब्रह्मस्तंब
पर्यंतमहमेवेति निश्चयी॥ निर्विकल्पः शुचिः शांतः प्राप्ताप्राप्तविनिर्वृतः॥७॥ नानाश्चर्यमिदं वि
श्वं न किंचिदिति निश्चयी॥ निर्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति॥८॥ इति ज्ञानाष्टकप्रकरणं॥

51

आब्रह्मेति॥ ब्रह्माणं हिरण्यगर्भमारभ्य स्तंबपर्यंतं सर्वं जगदहमेवेति प्रत्यक्षनिश्चयवान्पुरुषः
निर्विकल्पः संकल्पशून्यः अत एव शुचिर्विषयसंगरूपमल रहितः अत एव शांतो निश्चलांतःकर
णः अत एव प्राप्तयोरपि विषययोर्निवृत्तः परमसंतोषवान् आत्मानंदपूर्णत्वादित्यर्थः॥७॥ नन्वात्मज्ञा
नी कथं निर्विकल्पादिरूप इत्याशंक्याह॥ नानेति॥ अधिष्ठानतत्त्वसाक्षात्कारेणाध्यस्तबाधे सति 25॥

ननु मायाजडत्वान्न तएवकथं भावाभावविकारइत्याशंक्याह ॥ ईश्वरइति ॥ ईश्वरएवसर्वनिर्मातानत्वन्यो
जीवईश्वरपरवशत्वान्नइतिनिश्चयीपुरुषोनिश्चयवशादेवान्तर्गलितसर्वतृष्णः अत एवशांतोनिश्चल
चित्तः सन्क्वापिनसज्जते ॥ १ ॥ नन्वीश्वरएवचेत्सर्वनिर्माता काश्चिद्दरिद्राः काश्चिद्धनिनस्तथापि काश्चि
त्सुखिनः काश्चिद्दुःखिनोऽत्रच यत्तस्यवैषम्यनैर्घृण्यप्रसंगात्तन्मित्याशंक्याह । आपदइति ॥ कालेसम

ईश्वरः सर्वनिर्मातानेहान्यइतिनिश्चयी ॥ अन्तर्गलितसर्वाशः शांतः क्वापिनसज्जते ॥ १ ॥
आपदः संपदः कालेदैवादेवेतिनिश्चयी ॥ तृप्तः स्वस्थेंद्रियोनित्यंनवांछतिनशोचति ॥ ३
सुखदुःखेजन्ममृत्यूदैवादेवेतिनिश्चयी ॥ साध्यादर्शीनिरायासः कुर्वन्नपिनलिप्यते ॥ ४

यविशेषेआपदः संपदश्चदैवात्प्राक्तनादृष्टादेवेश्वरपरिपाचितादेवेतिनिश्चयीअतएवतृष्णावीततृष्णः
नित्यं अतएवस्वस्थेंद्रियोविषयानाकृष्टेंद्रियः अप्राप्तंनवांछतिनष्टंनशोचतीत्यर्थः ॥ ३ ॥ नन्वक्तनिश्चयवान्नापि
कर्माणिकुर्वन्नेवदृश्यतइत्याशंक्याह ॥ सुखेति ॥ कर्मफलंभुक्तेसुखादिकंदैवाददृष्टादेवेतिनिश्चयी
अतएवमयाइदंफलंसाध्यमित्यदर्शीअतएवनिरायासः श्रमरहितः प्रारब्धवशात्कुर्वन्नपिनलिप्य

अ॰ १० ॥ २६ ॥ एवमेवैतत्वस्थायाः फलीभूतांसुखेस्थितिं ॥ प्राहशिष्यः स्फुटीकर्तुमहमासेयथासुखं ॥
॥ १ ॥ अथैवमेवैतत्वस्थायाः फलीभूतांसुखावस्थांस्वकीयांविशदयितुमाह ॥ आकिं
चनेति ॥ अकिंचनभवंसर्वसंगाभावप्रभवंस्वास्थ्यंचित्तस्थैर्यंकौपीनत्वेपिकौपीना
मात्रावशेषेपिदुर्लभं ॥ अस्मात्कारणात्तु अहंत्यागादानेविहायत्यागादानयोरासक्तिंवि
आकिंचनभवंस्वास्थ्यंकौपीनत्वेपिदुर्लभं ॥ त्यागादानेविहायास्मादहमासेयथा
सुखं ॥ १ ॥ कुत्रापिखेदःकायस्यजिह्वाकुत्रापिखेद्यते ॥ मनःकुत्रापितत्त्यक्त्वापुरुषा
र्थेस्थितःसुखं ॥ २ ॥ कृतंकिमपिनैवस्यादितिसंचिंत्यतत्त्वतः ॥ यदायत्कर्तुमायाति
तत्कृत्वासेयथासुखं ॥ ३ ॥
हायययथासुखमनतिक्रम्याहमासेनकदाचिद्दुःखीत्यर्थः ॥ १ ॥ कुत्रापीति ॥ कुत्रापिशरीर ॥
कर्मणिकायस्यखेदः ॥ कुत्रापिवाचिककर्मणिजिह्वाखिद्यते ॥ कुत्रापिध्यानादिकर्मणि ॥
मनःखिद्यते ॥ अतोहंतत्रयमपित्यक्त्वासुखंयथास्यात्तथापुरुषार्थेस्वात्मन्येवस्थितः ॥ ॥
२ ॥ ननुकायवाङ्मनोव्यापारत्यागेदेहएवसद्यःपतेत्भोजनोपानादेरपित्यागादित्याह ॥ ॥
कृतमिति ॥ शरीरेंद्रियादिभिःकृतंकिमपितत्त्वतआत्मकृतंनस्यादितिसंचिंत्ययदायत्करीरा ॥ ॥

किंकर्मकर्तुंमाकालिनदैःकर्मकर्ता ...
निष्कर्मीकर्तुंपाचमालभिः ॥

कर्मेति॥ यथैव कर्मानुष्ठानमज्ञानात्तथैव तूपरमः कर्मोपरमोऽपि अज्ञानादेव तदुदं सम्यक् यथा
र्थेन बुद्ध्वा अहमेवं तदुपरमरहित एवास्थितः॥६॥ अचिंत्यमिति॥ अचिंत्यं ब्रह्मेति॥ चिंत्यमानो
ऽपि सोऽात्मचिंतालक्षणं रूपं भजति॥ तस्माद्धेतोस्त द्भावनां अचिंत्यं ब्रह्मेति भावनां त्यक्त्वा
अहमेवं भावनारहित एवास्थितः॥७॥ एवमेवेत्यवस्थायाः साधकोऽपि श्रेष्ठः किंपुनस्तत्स्वभाव

कर्मानुष्ठानमज्ञानाद्यथैवोपरमस्तथा॥ बुद्ध्वा सम्यगिदं तत्त्वमेवमेवाहमास्थितः॥६॥
अचिंत्यं चिंत्यमानोऽपि चिंतारूपं भजत्यसौ॥ त्यक्त्वा तद्भावनं तस्मादेवमेवाहमास्थि
तः॥७॥ एवमेव कृतं येन स कृतार्थो भवेदसौ॥ एवमेव स्वभावो यः स कृतार्थो भवेदसौ॥
८॥ इत्येवमेवाष्टकं द्वादशं प्रकरणं॥१२॥

३ तिकैमुनिकन्यायेनाह॥ एवमेवेति॥ येन एवमेव सर्वक्रियारहितमेव स्वस्वरूपं साधनवशा
त्कृतं सोऽसौ कृतार्थो भवेत् यस्तु एवमेव स्वभावः सोऽसौ कृतार्थो भवतीति किं वक्तव्यमित्यर्थः॥८॥
॥ इति श्रीमद्ब्रह्मस्वरविरचितायामष्टावक्रटीकायामेवमेवाष्टकं द्वादशं प्रकरणं॥१२॥

सुखादीति॥ भावेषु पुरुषार्थेषु सुखादिरूपानियमं सुख दुःखादिधर्माणां अनित्यत्वं भूरिशोऽव
गम्य तु पुरुषले षाल्लोकान् स्मात् सुखोपनिपातदर्शनाद्धेतो रहं यथासुखमासे॥१॥ इति श्रीमद्ब्रह्म
२७ स्वरविरचितायामष्टावक्रटी कायां यथासुखसप्तकं त्रयोदशं प्रकरणं॥१३॥ उदीरितां सु
खावस्थां समर्थयितुमात्मनि॥ प्राह शिष्यः शमावस्थां चतुःश्लोक्या गुरुं प्रति॥१॥ पूर्वं गुरुणोक्ता

सुखादिरूपानियमं भावेष्वालोक्य भूरिशः॥ शुभाशुभे विहायास्मादहमासे सुखं॥१॥ इति
यथासुखसप्तकं त्रयोदशं प्रकरणं॥१३॥ प्रकृत्या शून्यचित्तो यः प्रमादाद्भावभावनः
निद्रितो बोधित इव क्षीणसंसरणो हि सः॥१॥

पशमाष्टकमुक्तं॥ संप्रति तु शिष्यः स्वसुखावस्थासमर्थनार्थमात्मनः शमावस्थामाह॥ प्रकृत्येति॥
प्रकृत्या स्वभावेन विषयेषु शून्यचित्तः प्रमादादबुद्धिपूर्वकमारब्धवशाद्भावान् विषयान् भा
वयति चिंतयति भावभावनः निद्रितो बोधित इव सयथा निद्रावशात् शून्यचित्तः केनचिद्बोधित
स्तत्प्रमादाद्भावभावनः एवंविधो यः पुमान् विषयेषु शांतचित्तः स हि निश्चितं क्षीणसंसर

ननु कर्मता नैष्कर्म्यं वा यत्न कर्तृनिष्ठावश्यं त्वी कार्या पुरुषार्थस्थितेन्याशंक्याह॥ कर्मेति॥ कर्मनै
ष्कर्म्यनिर्बंधद्वन्द्वाभावाः स्वभावाद्देहस्य योगिनो देहासक्तयोगिन एव बाहं तु देहसंयोगाद्देहसंयो
गविरहादपि यथासुखमासेन पाचमम देहाद्यसंगाभावान्न कर्मनैष्कर्म्यनिर्बंधद्वन्द्वमित्यर्थः॥४॥
अथ लौकिकव्यापारेऽपि मम न निर्बंध इत्याह॥ अर्थेति॥ मम स्थित्यादिना साध्योऽनर्थो नैवा

कर्मनैष्कर्म्यनिर्बंधभावा देहस्थयोगिनः॥ संयोगायोगविरहादहमासे यथासुखं॥
॥४॥ अर्थानर्थौ न मे स्थित्या गत्या वा शयनेन वा॥ तिष्ठन्‌ गच्छन्‌ स्वपंस्तस्मादहमासे
यथासुखं॥५॥ स्वपतो नास्ति हानिर्मे सिद्धिर्यत्नवतो न वा॥ नाशोल्लासौ विहायास्मा
दहमासे यथासुखं॥६॥

नर्थः पूर्णानन्ददर्शित्वात्‌॥ तस्मादनासक्त्या तिष्ठन्‌ गच्छन्‌ स्वपन्‌ वाऽहं यथासुखमासे॥५॥ एवं
नदेवं अयं नेत्याह॥ स्वपतेति॥ स्वपतो यत्नरहितस्य मे मम हानिर्नास्ति। यत्नवतः सम्मम सिद्धि
र्नास्ति॥ अस्मात्कारणान्नाशोल्लासौ विहायाहं यथासुखमासे॥६॥

अथ॰ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां शिष्यप्रोक्तं शांतिचतुष्कं चतुर्दशं
१४॥ प्रकरणं॥१४॥ दुर्लक्ष्यमात्मनस्तत्त्वं श्रवणोपपत्तितु मंदमता॥ मुहुस्तत्त्वोपदेशार्थं गुरुरा
हदयोदधिः॥ यद्यपि प्रथममात्मतत्त्वोपदेशः कृतस्तथापि न दात्मतत्त्वमनेनवासि
मः पुनरुपदेष्टव्यं दुर्लक्ष्यत्वात्‌ यथाहं दोग्योपनिषदि नवकृत्वः श्वेतकेतुं प्रतीत्याचार्यशिक्षा

यथातथोपदेशेन कृतार्थः सत्त्वबुद्धिमान्‌॥ आजीवमपि जिज्ञासुः परस्तत्र विमुह्य
ति॥१॥ मोक्षो विषयवैरस्यं बंधो वैषयिको रसः॥ एतावदेव विज्ञानं यथेच्छसि
तथा कुरु॥२॥

+ पुरुषत्वपुंगवेदेविविदुमनयोरुविलासइतिभवानीप्रतिमहादेववचनात्‌ २

र्थं प्रसक्तदात्मोपदेशार्थं गुरुराह॥ तत्रादौ ज्ञानाधिकारिणमनधिकारिणं चाह॥ यथातथेति॥
सत्त्वबुद्धिमान्‌ शिष्यो यथातथा प्राप्ततोऽपुपदेशेन कृतार्थोऽपि स्यात्‌॥ अन एव कृतयु
गे प्रथमात्रोपदेशाधिशिष्याः कृतार्था बभूवुः परः असत्त्वबुद्धिर्यावज्जीवं जिज्ञासुरपि
बहुधोपदिष्टोऽपि विमुह्यति॥ यथा विरोचनो भल्लाणा बहुधोपदिष्टोऽपि मोहैवेत्यर्थः॥१॥ बंध
मोक्षौ सुखोपायेन संग्रहेणनिरूपयति॥ मोक्ष इति॥ विषयेष्वनुरागाभाव एव मोक्षो विषयेष्व

रागानुबंध इत्यर्थः॥ एवं नावबुद्ध्य मोक्षो यो विवि
हमुत्सृष्टं ज्ञानं। एवं ज्ञात्वा चरन्‌ यथेच्छसितया उ

कथनानीति॥विषयभावनाशून्यस्यपूर्णात्मदर्शिनोमेयदास्पृहाविषयतस्मात् गलितान
दोसिनमधनानिक्क॥विषयरूपादस्यवस्थेरः॥कशास्त्रंक्कचविज्ञानमहंब्रह्मास्मीतिनिदिध्या
सनंक्क॥धनादिविज्ञानांतेष्वपिममावस्थानास्तीत्यर्थः॥३॥विज्ञानइति।देहेंद्रियादीनां
साक्षिपुरुषेत्वंपदार्थेपरमात्मनिविश्वेश्वरेतत्पदार्थेज्ञातेब्रह्मा हमस्मीतिसाक्षात्कृते

क्व धनानि क्व मित्राणि क्व मे विषयदस्यवः॥ क्व शास्त्रं क्व च विज्ञानं यदा मे गलिता स्पृ
हा॥२॥ विज्ञाने साक्षिपुरुषे परमात्मनि चेश्वरे। नैराश्ये बंधमोक्षे च न चिंता मुक्तये मम
॥३॥ अंतर्विकल्पशून्यस्य बहिः स्वच्छंदचारिणः॥ भ्रान्तस्येव दशास्तास्तास्तादृशा एव
जानते॥४॥ इति शान्तिचतुष्कं॥

स्वतिनित्यनिर्मुक्तचिद्रूपात्मज्ञानानुभाववान्मोक्षबंधेपिनैराश्येसतिममसुमुक्षार्थंनचिंता॥
३॥ननुप्रमादाद्भावाभावकः कथंशांतइत्याशंक्याह॥ अंतर्विकल्पेति॥अंतःकरणेवि
कल्पशून्यस्यबहिर्भ्रांतस्येवस्वच्छंदचारिणः ज्ञानिनोदशास्ताः तादृशा एव ज्ञानिन एव जानते॥४॥

यतस्त्वंनिर्विकल्पोबोधात्माऽसि॥ अतोरागादिविकाररहितःसन्सुखंविचरेत्यर्थः॥५॥सर्वेति॥
सर्वभूतेषुकारणत्वेनानुस्यूतमात्मानंविज्ञायविभाव्य सर्वभूतानिचात्मनिअध्यस्तानी
तिविभाव्यअहंकारादेःसर्वस्यानात्मत्वेनेवस्फुरणात् अहंममाभिमानरहितस्त्वंसुखीभव
६॥सर्वभूतानिचा त्मनीत्येतद्विघटयति॥ विश्वमिति॥यत्रइदंविश्वंसागरेतरंगाइवा

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। विज्ञाय निरहंकारो निर्ममस्त्वं सुखी भव॥६॥
विश्वं स्फुरति यत्रेदं तरंगा इव सागरे। तत्त्वमेव न संदेहश्चिन्मूर्ते विज्वरो भव॥७॥ श्रद्ध
त्स्व तात श्रद्धत्स्व नात्र मोहं कुरुष्व भोः॥ ज्ञानस्वरूपो भगवानात्मा त्वं प्रकृतेः परः॥८॥

धिष्ठानाभिन्नत्वेनतेचैतन्यंत्वमेव अतःकारणात्हे चिन्मूर्तेत्वंविज्वरोभवचिन्मात्रोहमित्य
नुभवान्निश्चितसर्वसंतापोभवेत्यर्थः॥७॥परमकारुणिकतयापुनःपुनर्बोधयति॥श्रद्धत्स्वे
ति॥हेतातश्रद्धत्स्वअत्रचिद्रूपतायांअसंभावनाविपरीतभावनारूपंनकुरुष्वअत्रेत्युक्तेवि
घटयति॥ज्ञानेति॥ज्ञानस्वरूपःप्रकृतेःपरस्त्वं कीदृशस्त्वंभगवान्तत्पदार्थःतथाऽऽत्मा

60

द्वंद्वं तु विषयवैरस्यं तत्त्वबोधसाध्यमित्याह ॥ वाग्मीति ॥ अयं प्रसिद्धः । आत्मतत्त्वबोधो वाग्मि
नं बहुचतुरवाक्यभाषिणं मूकं करोति ॥ प्राज्ञं नानाविशेषवेदिनं जनं जडं करोति ॥ महोद्यो
गं नानाक्रियानुष्ठानशालिनं अलसं निष्क्रियं करोति ॥ मनसः प्रत्यक्प्रवणतया वागादयः
कुंठिता भवंतीति न इह हितो भवतीत्यर्थः ॥ यतोऽयं तत्त्वबोधो वागादीन्कुंठितान्करोति ॥ अ

वाग्मिप्राज्ञमहोद्योगं जनं मूकं जडालसं ॥ करोति तत्त्वबोधोऽयमतस्त्यक्तो बुभुक्षुभिः ॥३॥
न त्वं देहो न ते देहो भोक्ता कर्ता न वा भवान् । चिद्रूपोऽसि सदा साक्षी निरपेक्षः सुखं चर ।
४॥ रागद्वेषौ मनोधर्मौ न मनस्ते कदाचन । निर्विकल्पोऽसि बोधात्मा निर्विकारः सुखं चर ।
५॥

तो हेतोर्भोगेच्छुभिस्त्यक्तः अनादृत इत्यर्थः ॥३॥ तत्त्वबोधसिद्ध्यर्थमुपदिशति ॥ नत्वमिति ॥ त्वं
देहादिरूपो न यतश्चिद्रूपोऽसि नापि न वदेहसंबंधः ॥ असंगो ह्ययं पुरुष इति श्रुतेः । न वा भवान्
कर्ता भोक्ता यतः कर्तृभोक्तृप्रभृतीनां सदा साक्षी यो यत्साक्षी स तद्भिन्नो यथा घटसाक्षी घटा
[illegible]

अष्टा०
३०

एकस्मिन्निति ॥ एकस्मिन् सजातीयविजातीयस्वगतभेदशून्ये अव्यये शांते च कार्यशून्ये चिदा
काशे निर्मले [illegible] सर्वोपाधिशून्ये त्वयि कुतो जन्म कुतश्च कर्म कुतश्चाहंकारः । द्वितीय
स्य हेतोरभावात् [illegible]व्ययस्य च जन्मासंभवात् कार्यशून्यस्य कर्मकर्तृत्वासंभवात् निर्मलस्य चा
हंकारासंभवादित्यर्थः ॥१३॥ एकत्वमुपपादयति ॥ यत्त्वमिति ॥ यद्यत्कार्यं त्वं पश्यसि तत्र का

एकस्मिन्नव्यये शांते चिदाकाशेऽमले त्वयि । कुतो जन्म कुतः कर्म कुतोऽहंकार एव च ॥१३॥
यत्त्वं पश्यसि तत्रैकस्त्वमेव प्रतिभाससे । किं पृथग्भासते स्वर्णात्कटकांगदनूपुरं ॥१४॥ अयं
सोऽहमयं नाहं विभागमिति संत्यज । सर्वमात्मेति निश्चित्य निःसंकल्पः सुखी भव ॥१५॥ त
वैवाज्ञानतो विश्वं त्वमेकः परमार्थतः । त्वत्तोऽन्यो नास्ति संसारी नासंसारी च कश्चन ॥१६॥

रणरूपस्त्वमेव एकः प्रतिभाससे कटकांगदादेः स्वर्णवदित्यर्थः ॥१४॥ अयं सोऽहमिति ॥ कारण
रूपश्चात्मैव सर्वमिति निश्चित्य भेदभ्रांतिं त्यज तथा च निर्विकल्पो विगतनानाप्रतिभासः सन् सुखी भ
व द्वैतीयप्रतिभानादि दुःखं भवतीत्यर्थः ॥१५॥ विभागत्यागे युक्तिमाह ॥ तवैवेति ॥ तवैव
अज्ञानतो विश्वं विश्वाकारो विक्षेपः अतः परमार्थतस्त्वमेकः अतः संसारी असंसारी च त्वत्तो

61

गुणैरिति॥ गुणैरिंद्रियादिभिः संवेष्टितो देहस्तिष्ठत्यायाति याति तथा किं चिन्त्या(?)ल्पया(?)ति च गच्छति देहादिभिन्नमात्मानं तु न गंता नागंता अतोऽहं गंता नाहं गमिष्यामीत्येवमेव मे नं किं शोचसि देहधर्मैरात्मानं मा स्म शोचस्वेत्यर्थः॥९॥ नापि देहस्थित्युत्क्रान्तिभ्यां तव वृद्धिहानी इत्याह॥ देहस्त्विति॥ नित्यचिन्मात्ररूपिणस्तव देहस्थित्या न वृद्धिर्न वा देहनिवृत्त्या हानिरित्यर्थः॥१०॥

गुणैः संवेष्टितो देहस्तिष्ठत्यायाति याति च। आत्मा न गंता नागंता किमेनमनुशोचसि॥९॥
देहस्तिष्ठतु कल्पान्तं गच्छत्वद्यैव वा पुनः। क्व वृद्धिः क्व च वा हानिस्तव चिन्मात्ररूपिणः॥१०॥
त्वय्यनंतमहाम्भोधौ विश्ववीचिः स्वभावतः। उदेतु वास्तमायातु न ते वृद्धिर्न वा क्षतिः॥११॥
तात चिन्मात्ररूपोऽसि न ते भिन्नमिदं जगत्। अतः कस्य कथं कुत्र हेयोपादेयकल्पना॥१२॥

त्वयीति। विश्वाख्या वीचिरपि चानंतेऽनंते चित्समुद्रे उदेतु अस्तं वा समायातु एतावतापि ते न वृद्धिर्न वा क्षतिः न वा नंतत्वादित्यर्थः॥११॥ तातेति॥ सर्वस्याच्च दभिन्नत्वात्किं हेयमुपादेयं कस्य केन वा प्रकारेण हेयमुपादेयं कुत्र वा हेयमुपादेयमित्यर्थः॥१२॥

इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां तत्त्वोपदेशविंशतिकं पंचदशं प्रकरणं॥१५॥

अष्टा० ३१

एवमुक्तेऽपि न सर्वस्य विस्मृतिर्मुक्तिसाधनं॥ तस्माद्यत्नं विना विच्छेदहेतोस्तत्त्व(?)त्ववर्णयेन॥ १॥ तत्त्वज्ञानेन सर्वग्रहं च सम्यग्युक्तेन याति विस्मरणकाशिणो वस्त्राप्ययादिना मुक्तिर्नान्यथेति निविशेषमुपदिशति॥ आचक्ष्वेति॥ हे तात त्वं नानाशास्त्राणि अनेकशः अनेकवारं शिष्येभ्यः आचक्ष्व

आचक्ष्व शृणु वा तात नानाशास्त्राण्यनेकशः। तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते॥१॥
भोगं कर्म समाधिं वा कुरु विज्ञ तथापि ते। चित्तं निरस्तसर्वाशमत्यर्थं रोचयिष्यति॥२॥

सर्व

स्वगुरुभ्यः शृणु वा तथापि तव सर्वविस्मरणादृते स्वास्थ्यं श्रेयो नेत्यर्थः॥१॥ यद्यपि विषयविस्मरणमस्ति तथापि अज्ञानविस्मरणं नास्तीति भावः॥ जीवन्मुक्तस्य तु सर्वस्याध्यस्तत्वात्तु भवतीति सूचयन्नाह॥ भोगमिति॥ हे विज्ञ त्वं भोगं कुरु तथापि ते चित्तं अत्यर्थं रोचयिष्यति॥ स्वरूपे रुचिमुत्पादयिष्यति कीदृशं चित्तं निरस्तसर्वाशं॥ सर्वविस्मरणे सति सर्वा

भ्रांतिमात्रमिति॥इदं विश्वं भ्रांतिमात्रमसिद्धं। अतो हेतोर्न किंचिन्स्पष्टत्वकर्तृत्वारहितमित्यर्थः॥इति
निश्चयी॥अतः सर्वस्य निरस्तत्वान्निर्वासनः स्फूर्तिमात्रो वासनारहितस्फूर्तिमात्रः सन् न किं
चिदिव निरस्ताशेषविशेषः शाम्यति॥१७॥एक एवेति॥कालत्रयेऽपि भवांभोधौ एक एव त्वमेवास्त्र
न्तस्व बंधो मोक्षो न स्तः अतस्त्वं कृत्यः सन् सुखं चर॥१८॥मा संकल्पेति॥हे चिन्मय त्वं संकल्प

भ्रांतिमात्रमिदं विश्वं न किंचिदिति निश्चयी। निर्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति
॥१७॥एक एव भवांभोधावासीदस्ति भविष्यति॥न ते बंधोऽस्ति मोक्षो वा कृतकृत्यः सुखं चर॥१८॥
मा संकल्पविकल्पाभ्यां चित्तं क्षोभय चिन्मय। उपशाम्य सुखं तिष्ठ स्वात्मन्यानंदविग्रहे॥१९॥
त्यजैव ध्यानं सर्वत्र मा किंचिद्धृदि धारय॥आत्मा त्वं मुक्त एवासि किं विमृश्य करिष्यसि॥२०॥

इति तत्त्वोपदेशविंशतिकं पंचदशं प्रकरणं॥१५॥

विकल्पाभ्यां चित्तं मा क्षोभय उपशाम्य उपरतसंकल्पविकल्पो भव आनंदरूपे स्वात्मनि सुखं तिष्ठ॥१९॥
[illegible] त्यजेत्याह॥त्यजेति॥सर्वत्र ध्यानं त्यज कुत्रापि ध्यानं मा कार्षीरित्यर्थः॥एतदेव विषदय
[illegible]

मना निपेक्षस्तु विरक्त कामुकाभ्यां विलक्षण इत्याह। विरक्त इति॥मुमुक्षुः सन् यो विषये द्वे
षी स विरक्तः कथ्यते कामस्तापेक्षः सन् यो विषयलोलुपः स रागीति कथ्यते यस्तु ग्रहमोक्षा
भ्यां विहीनः ग्रहमोक्षेच्छाभ्यां विहीनः स विरक्तसरक्ताभ्यां विलक्षणः सर्वतो निरपेक्षतया
हानोपादानेच्छारहितत्वादित्यर्थः॥६॥ननु ज्ञानिनोऽपि हानोपादानादिव्यवहारो दृश्य

विरक्तो विषयद्वेष्टा रागी विषयलोलुपः॥ग्रहमोक्षविहीनस्तु न विरक्तो न रागवान्॥६
हेयोपादेयता तावत्संसारविटपांकुरः। स्पृहा जीवति यावद्वै निर्विचारदशास्पदं। ७
प्रवृत्तौ जायते रागो निवृत्तौ द्वेष एव हि। निर्द्वंद्वो बालवद्धीमानेवमेव व्यवस्थितः॥८॥

तेत्याह॥हेयोपादेयतेति॥निर्विचारदशास्पदं अविवेकदशामयी भूता स्पृहा तु स्त्री यावत्
जीवति तावत्पर्यंतमेव हेयोपादेयता॥हानोपादानादिव्यवहारः संसारवृक्षस्य शाखांकुरो
भवति॥ज्ञानिनां तु स्पृहाभावात्सत्यपि हानादिव्यवहारे संसारशाखाप्रसरो न भवतीत्यर्थः॥७॥
प्रवृत्ताविति॥प्रवृत्तौ सत्यां प्रवृत्तौ सत्यामुत्तरोत्तरं विषयेषु रागो जायते। विषयेऽपि द्वेषपूर्वक
निवृत्तौ सत्यामुत्तरोत्तरं विषयेषु द्वेष एव हि जायते अतो धीमान् ज्ञानी बालवत् शुभाशुभानुसं

66

सर्वतस्मात्तल्लयेसतिनुक्तेनेनापिकर्मणादुःखहेतुरायासोनभवतीतिसूचयन्नाह। आया
सादिति॥सकलोजनः आयासादेवदुःखीभवतिपरंतुकश्चनएनंआयासंतज्ज्ञानातिदुःख
हेतुरायासमितिनवेत्ति॥अनेनेति॥आयासात्सकलोदुःखीत्यनेनैवोपदेशेनधन्यःसुकृ
तीनिर्वृतिंपरमसुखंप्राप्नोति॥३॥व्यापारमिति॥व्यापारानासक्तिःसुखहेतुरित्याह।यःकर्मणा

आयासात्सकलोदुःखीनैनंजानातिकश्चन।अनेनैवोपदेशेनधन्यःप्राप्नोतिनिर्वृतिं
३॥व्यापारेखिद्यतेयस्तुनिमेषोन्मेषयोरपि।तस्यालस्यधुरीणस्यसुखंनान्यस्यकस्यचि
त्॥४॥इदंकृतमिदंनेतिद्वंद्वैर्मुक्तंयदामनः।धर्मार्थकाममोक्षेषुनिरपेक्षंतदाभवेत्॥५॥

निमेषोन्मेषयोरपिव्यापारेखिद्यतेअनासक्तोभवतितस्यआलस्यधुरीणस्यक्रियाभिनिवेश
रहितस्यसुखंनान्यस्येत्यर्थः॥४॥क्रियाभिनिवेशयुक्तस्यसर्वतस्माद्विलयेसतिद्वंद्वहानि
र्भवतीतिसूचयन्नाह॥इदंकृतमिति॥इदंकृतमिदंनेत्यादिद्वंद्वैर्मुक्तंयदामनोभवतितदा
[illegible]भवेत्॥द्वंद्वहानीतस्यजीवन्मुक्तत्वादित्यर्थः॥५॥पुरुषार्थेका

अ॰ष्टा॰
३३

अथातःश्लोकविंशत्यात्मज्ञानदशोच्यते।विद्यानन्दप्रकर्षस्यमुक्तयेगुरुणास्फुटं॥१॥अथान्ये
षामपिविद्यायांप्रहृष्टार्थंतत्त्वज्ञानफलव्याख्यानंतयातत्त्वज्ञदशांगुरुर्निरूपयति॥तेनेति॥
तेनैवज्ञानफलंप्राप्तंयःआत्मन्येवतृप्तोनभोगादिना॥अतएवस्वच्छेंद्रियोविषयानासक्तेंद्रि
यःसनएकाकीविषयसंयोगंविनैवनित्यमात्मन्येवरमते॥१॥नकदाचिदिति॥हंतेतिहर्षसं

67

तेनज्ञानफलंप्राप्तंयोगाभ्यासफलंतथा।तृप्तःस्वच्छेंद्रियोनित्यमेकाकीरमतेतुयः॥१॥
नकदाचिज्जगत्यस्मिंस्तत्त्वज्ञोहंतखिद्यति।यतएकेनतेनेदंपूर्णंब्रह्मांडमंडलं॥२॥नजातु
विषयाःकेपिस्वारामंहर्षयंत्यमी।सल्लकीपल्लवप्रीतमिवेभंनिंबपल्लवाः॥३॥

बोधनेहेशिष्यअस्मिन्जगतिकदाचिदपितत्त्वज्ञोनखिद्यतेयतएकेनैवतेनेदंब्रह्मांडमंडलं
पूर्णंव्याप्तंअतोद्वितीयस्याभावान्नखिद्यतीत्यर्थः॥२॥नजात्विति॥स्वस्मिन्नात्मन्येवरमतेतं
स्वारामंजातुकदाचित्अमीविषयानहर्षयंतीत्युक्त्वात्रयथासल्लकीपल्लवप्रीतंगजेंद्रंनिंबप
ल्लवानहर्षयंतिकटुत्वादित्यर्थः॥३॥

राम
३३

68

धानरहितः निर्द्वंद्वः रागद्वेषविहीनः सन् एवमेव रागाज्ञाप्रवृत्तिद्वेषज्ञानिवृत्तिर्द्वेषवशाद्विवृत्ति
रहित एव स्थितः केवलमारब्धवशादेव कदाचित्प्रवर्त्तते कदाचिन्निवर्त्तते च न तु रागद्वेषवशा
दित्यर्थः॥७॥ हातुमिच्छतीति॥ यस्तु रागी स दुःखजिहासया संसारं हातुमिच्छति॥ वीतरागस्तु नि
र्दुःखः वीतरागो त्यद्दुःखरहितत्वात्तस्मिन्संसारे सत्यपि न खिद्यते खेदं न प्राप्नोति॥८॥ यस्येति॥ त्र्यहं

हातुमिच्छति संसारं रागी दुःखजिहासया॥ वीतरागो हि निर्दुःखस्तस्मिन्नपि न खिद्यति॥८॥
यस्याभिमानो मोक्षेऽपि देहेऽपि ममता तथा॥ न च ज्ञानी न वा योगी केवलं दुःखभागसौ॥
१०॥ हरो यद्युपदेष्टा ते हरिः कमलजोऽपि वा॥ तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते॥११॥

इति विशेषोपदेशः॥१६

दृष्टी त्रिकालज्ञानी मुक्त इत्येवं यस्य मोक्षेऽप्यभिमानो नासौ ज्ञानी तथाऽहं योगाभ्यासी देहस्यैव गुणाध
मो धर्मरतः मम देहो वज्रकाहारवहूपवासादि समर्थ इत्येवं देहेऽप्यभिमानो नासौ योगी न वा ज्ञानी
केवलमसौ दुःखभाक् दुःखी त्वहं ममाभिमानानिवृत्तेरित्यर्थः॥११॥ सर्वविस्मरणोपदेशमुप
संहरति॥ हरो यदीति॥११॥ इति श्रीमद्विश्वेश्वर विरचितायामष्टावक्रटीकायां विशेषोपदेश
ना

अ॰टी॰ ३७॥ कृतार्थेति॥ अहं मनेनानेन ज्ञानेन कृतार्थ इत्येवं गलितधीः कृती॥ पश्यन्नपि शृण्व
मननिक्रमणात्ले कृतार्थत्वधियः स्वच्छा हि इन्द्रियव्यापारे सत्यपि ज्ञानि विरक्तवन्न खेदो न भ
वतीत्यर्थः॥२॥ शून्येति॥ क्षीणः संसारसागरो यस्य स तस्मिन्क्षीणसंसारसागरे पु
रुषे स्पृहा विषयेच्छापि न। विरक्तिर्वा विषयविरक्तिश्च न तस्य मनः कायेन्द्रियव्यापारो वालो

कृतार्थोनेन ज्ञानेनेत्येवं गलितधीः कृती॥ पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्नास्ते यथासु
खं॥२॥ शून्या दृष्टिर्वृथा चेष्टा विकलानीन्द्रियाणि च॥ न स्पृहा न विरक्तिर्वा क्षीणसंसा
रसागरे॥३॥

मन्त्रादिवदित्याह॥ शून्येति॥ तस्य दृष्टिर्मनोव्यापारः शून्या संकल्पविकल्परहिता॥ चे
ष्टा कायव्यापारो वृथा फलमनुद्दिश्यैव तस्य इन्द्रियाणि विकलानि पुरः स्थितानामपि वि
षयाणामनिर्णायकत्वात्॥ तदुक्तं॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरित्यर्थः॥ टी॰म॰
॥३॥ ३४॥

70

यदित्विति॥यस्य भुक्तेषु आसक्तिर्न भवति अभुक्तेषु आकांक्षा न भवति आत्मरतत्वात् तादृशो
भवदुर्लभः संसारेऽतिविरल इत्यर्थः॥४॥बुभुक्षुरिति॥संसारे बुभुक्षुर्मुमुक्षुश्चानेकधा दृश्य
ते भोगमोक्षनिराकांक्षी महति पूर्णे ब्रह्मणि आशयोऽन्तःकरणं यस्य स महाशयो विरलः॥
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः इति भगवद्वचनात्॥५॥धर्मार्थेति॥पुरुषार्थचतुष्टये

यस्तु भोगेषु भुक्तेषु न भवत्यधिवासितः॥अभुक्तेषु निराकांक्षी तादृशो भवदुर्लभः॥४
बुभुक्षुरिह संसारे मुमुक्षुरपि दृश्यते॥भोगमोक्षनिराकांक्षी विरलो हि महाशयः॥५॥
धर्मार्थकाममोक्षेषु जीविते मरणे तथा॥कस्याप्युदारचित्तस्य हेयोपादेयता नहि॥६॥
वांछा न विश्वविलये न द्वेषस्तस्य च स्थितौ॥यथा जीविकया तस्माद्धन्य आस्ते यथासुखं॥७॥

येन तथा जीवितमरणयोरर्थयोः अयं हेयोपादेयरहितो विरल इत्यर्थः॥६॥वांछेति॥तस्मात्
ज्ञानिनो विश्वविलये प्रपंचस्य स्थितौ च द्वेषो नास्ति॥अधिष्ठानत्वेनैव स्फुरणात् तस्मात्कारणात्
[illegible] यथा प्राप्तया जीविकया सुखमनतिक्रम्यैवास्ते इत्यर्थः॥७॥

अ०गी०
३५

इदमेव विवृणयति॥न निंदतीति॥स्पष्टं॥१३॥किंच सानुरागामिति॥सानुरागां स्त्रियं दृष्ट्वा मृत्युं वास
मुपस्थितं दृष्ट्वा अविह्वलमनाः कामभयाभ्यां विमुक्तमना महाशयो मुक्त एव॥१४॥किंच सुखे
ति॥स्पष्टं॥१५॥नहिंसेति॥क्षीणसंसरणेऽनरे नराभिमानरहिते विदुषि हिंसा नाम परद्रोहरू
पादयो मनोविकारा न भवन्तीत्यर्थः॥१६॥नमुक्त इति॥जीवन्मुक्तो विषयद्वेष्टापि न॥न वा विषय

न निंदति न च स्तौति न हृष्यति न कुप्यति॥न ददाति न गृह्णाति मुक्तः सर्वत्र नीरसः॥१३॥
सानुरागां स्त्रियं दृष्ट्वा मृत्युं वा समुपस्थितं॥अविह्वलमनाः स्वस्थो मुक्त एव महाशयः॥१४॥
सुखे दुःखे नरे नार्यां संपत्सु च विपत्सु च॥विशेषो नैव धीरस्य सर्वत्र समदर्शिनः॥१५॥नहिं
सा नैव कारुण्यं नौद्धत्यं न च दीनता॥नाश्चर्यं नैव च क्षोभः क्षीणसंसरणे नरे॥१६॥नमुक्तो
विषयद्वेष्टा न वा विषयलोलुपः॥असंसक्तमना नित्यं प्राप्ताप्राप्तमुपाश्नुते॥१७॥समा
धानासमाधानहिताहितविकल्पनाः॥शून्यचित्तो न जानाति कैवल्यमिव संस्थितः॥१८॥

लोलुपः किं तर्हि असंसक्तमना अविह्वलमनाः सन् प्रारब्धवशात् प्राप्ताप्राप्तं उपाश्नुते भुंक्ते इत्य
र्थः॥१७॥समाधानेति॥बहिःशून्यचित्तो ज्ञानी समाधानादि विविधाः कल्पना न जानाति उत्प्रेक्ष

71

३

न जागर्तीति॥ ज्ञानी न जागर्ति जाग्रदवस्थावान्न भवति। अंतर्बहिर्विषयाननुसंधानादिति हेतुमाह॥ नोन्मीलतीति॥ बाह्यविषयान्नानुसंधत्ते इत्यर्थः तथा ज्ञानी न निद्राति यतो न निमीलति जडो न भवति अन्यथा सर्वान्विषयान्ब्रह्मत्वेन पश्यतीत्यर्थः॥ कात र्हि तस्य दशेत्यत आह॥ अहो इत्याश्चर्ये॥ मुक्तचेतसः कापि अलौकिकी परदशा उत्कृष्टावस्था तुरीयातीतेत्यर्थः॥१०॥

72

न जागर्ति न निद्राति नोन्मीलति न मीलति॥ अहो परदशा कापि वर्तते मुक्तचेतसः॥१०॥
सर्वत्र दृश्यते स्वस्थः सर्वत्र विमलाशयः॥ समस्तवासनामुक्तो मुक्तः सर्वत्र राजते॥११॥
पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्गृह्णन्वदन्व्रजन्॥ ईहितानीहितैर्मुक्तो मुक्त एव महाशयः॥१२

इदमेव विशदयति॥ सर्वत्रेति॥ सर्वत्र सुखदुःखे च स्वस्थश्चित्तस्वस्थाः सर्वत्र शत्रौ मित्रे च विमलाशयः सर्वत्र शमदर्शी यतः समस्त विषयवासनाभ्यो मुक्तः अत एव मुक्तः सर्वत्र सर्वासु दशासु राजते दीप्यते पूर्णात्मदर्शित्वात्॥११॥ पश्यन्निति॥ प्रारब्धवशात् दर्शनादिकं बहिरिंद्रियव्यापारं कुर्वन्नपि ईहितानीहितैरिष्टानिष्टैर्मुक्तो महाशयो महति आत्मनि आशयो यस्य स महाश[illegible]॥१२॥ ॥॥॥

अष्टा० २६

ननु धनिनोपि सुखिनः दृश्यंते तेन न कथं संकल्प एव सुखे कारणमित्याशंक्याह॥ अर्जयित्वेति॥ अखिलानर्थान् धनधान्यकांतादीन् अर्जयित्वा पुष्कलान् बहुविधान् भोगानेव आप्नोति न तु सुखे कारणं तत्त्वे यद् दुःखभागित्वात् सर्वपरित्यागमंतरेण सर्वसंकल्पविकल्पत्यागं विना सुखी सुखैकरूपो न हि भवेन्नैव स्यात्॥२॥ ननु संकल्पविकल्पयोस्तु त्यागस्तु उक्तत्वज्ञानमेव॥ त्याग मात्रस्य यथार्थत्वात् पुत्रेत्तु उक्तत्वज्ञानमेव त्यागः अस्तत्त्यागासंभवात्॥ इदमेव रूपकालंका

73

अर्जयित्वाखिलानर्थान्भोगानाप्नोति पुष्कलान्॥ न हि सर्वपरित्यागमंतरेण सुखी भवेत्
२ कर्तव्यदुःखमार्तंडज्वालादग्धांतरात्मनः॥ कुतः प्रशमपीयूषधारासारमृते सुखं॥३॥

रेण विशदयति॥ कर्तव्येति॥ कर्तव्यानि यानि यानि कर्माणि तानि तानि दुःखान्येव मार्तंडज्वाला रवतरसूर्यातपस्तेन दग्धः अंतरात्मा मनो यस्य तस्य संकल्पप्रशमामृतधारालक्षणं आसारं विना सुखं कुतः स्यात्॥३॥ संकल्पप्रशमस्यामृतत्वं संसाररूपविषनिवर्तकत्वादित्याशयेनाह॥

२६

३

निर्ममेति॥ अहं ममाभिमानशून्यस्तथाधिष्ठानातिरिक्तं किंचिन्नास्तीति निश्चयवान्॥ अत एवांत-
र्गलितसर्वाशः अत एव कुर्वन्नपि न करोति कर्तृत्वाभिमानरहितत्वादित्यर्थः॥१९॥ मन इति॥
गलितं सविशेषग्रहनिष्ठं मानसं यस्य स ज्ञानी कामपि अनिर्वाच्यां दशां संप्राप्तो भवेत्॥ तदेव दर्शय-
ति॥ मनः प्रकाशादिविवर्जितः सविशेषप्रकाशाभावात्॥ तथा संमोहवर्जितः अन्यकृतावरणचिन्तनात्

निर्ममो निरहंकारो न किंचिदिति निश्चितः॥ अंतर्गलितसर्वाशः कुर्वन्नपि न लिप्यते॥१९॥
मनःप्रकाशसंमोहस्वप्नजाड्यविवर्जितः॥ दशां कामपि संप्राप्तो भवेद्गलितमानसः॥२०॥
इति तत्त्वज्ञस्वरूपविंशतिकं॥१७॥ यस्य बोधोदये तावत्स्वप्नवद्भवति भ्रमः॥ तस्मै सुखैकरू-
पाय नमः शान्ताय तेजसे॥१॥

अत एव स्वप्नविवर्जितो जाड्येन सुषुप्त्या च विवर्जित इत्यर्थः॥२०॥ इति श्रीमद्विश्वेश्वरविरचिताया-
मष्टावक्रटीकायां तत्त्वज्ञस्वरूपविंशतिकं सप्तदशं प्रकरणं॥१७॥ तत्त्वाभिज्ञफलीभूतशमस्यै-
व प्रधानतां॥ व्याख्यातुं वर्णयते शान्तिः शतश्लोकैः पुनः स्फुटं॥१॥ तत्र तावच्छान्तेः प्रधानतेति व्योपयि-
तुं फलीभूतां तां शान्तिं वर्णयितुकामः शान्तिशालिनं नमस्करोति॥ यस्येति॥ बोधोदये सति तावत्
[illegible] ज्ञानेन भवति [illegible] शान्ताय निहतसंकल्पविकल्पाय
[illegible] नमः॥१॥

अष्टा० ३७

कथं तर्हि तत्त्वज्ञानेन तत्प्राप्तिव्यवहारः शास्त्रकाराणां नित्यप्राप्तस्य भ्रान्तिनाशमात्रादित्याह॥
व्यामोहेति॥ ज्ञानेन निरावरणदृष्टयः अविद्यानाशेन दृष्टयो व्यामोहमात्रस्य प्रपंचभ्रान्तिमात्र-
स्य विरतौ सत्यां स्वरूपादानमात्रतः आत्मविश्रान्तिमात्रतो वीतशोका विराजन्ते सर्वदा स्वभा-
वेनैव पूर्णां स्थितिं यान्ति याप्रकाशन्त इत्यर्थः॥६॥ आत्मज्ञानरहस्यमाह॥ समस्तमिति॥ स्प-
ष्टार्थमिदं॥७॥ समस्तं कल्पनामात्रमिति॥ ज्ञानस्य निदानभूतं तत्त्वंपदार्थैक्यज्ञानमाह॥॥

व्यामोहमात्रविरतौ स्वरूपादानमात्रतः॥ वीतशोका विराजन्ते निरावरणदृष्टयः॥६॥ समस्तं
कल्पनामात्रमात्मा मुक्तः सनातनः॥ इति विज्ञाय धीरो हि किमभ्यस्यति बालवत्॥७॥ आ-
त्मा ब्रह्मेति निश्चित्य भावाभावौ च कल्पितौ॥ निष्कामः किं विजानाति किं ब्रूते च करोति किं॥८॥

आत्मेति॥ आत्मा त्वंपदार्थः ब्रह्म तत्पदार्थाभिन्न इति निश्चित्य अधिष्ठानसाक्षात्काराच्च भा-
वाभावौ घटादितदभावौ कल्पिताविति निश्चित्य तथा च सर्वस्यानुच्छेद्यत्वानुसंधानात्कामहे-
तुत्वविद्याविलयाच्च निष्कामः सन् किं विशिष्टतया जानाति किं ब्रूते किंच कार्यं करोति कर्तृत्वा-
भिमानरहितत्वात् ज्ञातापि न वक्तापि न क्रियाकर्तापि नेत्यर्थः॥८॥ सर्वमात्मेति ज्ञानं सर्वकल्प

भवोयमिति॥अयंभवः भावनामात्रः संकल्पमात्रप्रभवः परमार्थेन आत्मव्यतिरिक्तं किंचि
न्नास्ति परमार्थेन तु आत्मैव भावरूपः न भवोयमिति॥ननु अभावस्वरूपोपि प्रपंचः कालादि
वशात् अस्य भावरूपता शंकामाह॥नास्तीति॥भावाभावेषु विभाविनां स्थितानां अभावो नास्तीति
नहि उत्पन्नस्य भावो बहुः कदाचिदपि शीतलस्वभावो दृष्टः॥ तथा च मनोराज्यवत् भावनामात्र
सिद्धः सन् भावः प्रपंचो भावनानिवृत्तौ निवर्तते इति संकल्पप्रशमः॥ संसारविषयतापाप

भवोयं भावनामात्रो न किंचित्परमार्थतः॥नास्त्यभावः स्वभावानां भावाभावविभावि
नां॥४॥न दूरं न च संकोचाल्लब्धमेवात्मनः पदं।निर्विकल्पं निरायासं निर्विकारं निरंज
नं॥५॥

हेदात्मा मनप्राप्तिहेतुत्वात् मननमिति भावः॥४॥ननु संकल्पोपरममात्रेण कथमात्मा मनप्राप्ति
रित्याशंक्य तस्य नित्यप्राप्तत्वमाह॥नदूरमिति॥आत्मनः पदं स्वरूपं दूरं नास्तीति नापि संकोचा
द् नैव परिच्छिन्नं नास्ति परिपूर्णत्वात्॥ अत एव आत्मनः पदं नित्यं लब्धं प्राप्तमेवास्ति संकल्प
वशात् पुनरप्राप्तमिवाविद्यमानं कंठेगतचामीकरवत् कीदृशं पदं निर्विकल्पं विकल्पा
तीतं विकल्पाभावग्राह्यं ज्ञानयानिरायासं श्रमं यासातीतं न द्रष्टव्यगम्यं वा निर्विकारं विका

नितिनिरंजनं उपाधिमलरहितं॥

कथं तर्हि जीवन्मुक्तस्य लोके क्रियेत्याशंक्य जीवनादृष्टवशादेवेत्याह॥कृत्यमिति॥जीवन्मु
क्तस्य योगिनः संकल्पवशात् किमपि कृत्यं नास्ति तथा हृदि मनसि कापि रंजना कोपि अनुरा
गो नास्ति नहि तु मम तावद्विद्यायाः अभावात्॥तथापि अस्य कृत्यं यथा जीवनं जीवनादृष्टमन
तिक्रम्य भवतीत्यर्थः॥१३॥क्वमोहइति॥संकल्पसीमायामात्मबुद्धौ विश्रांतस्य मोहादिकं क्व भ

कृत्यं किमपि नैवास्ति न कापि हृदि रंजना॥यथा जीवनमेवेह॥जीवन्मुक्तस्य योगिनः॥१३॥
क्व मोहः क्व च वा विश्वं क्व च ध्यानं क्व मुक्तता॥सर्वसंकल्पसीमायां विश्रांतस्य महात्मनः
१४॥येन विश्वमिदं दृष्टं स नास्तीति करोतु वै।निर्वासनः किं कुरुते पश्यन्नपि न पश्य
ति॥१५॥

वति किं कारणमाश्रित्य भवति॥न किमपि कारणमाश्रित्य भवति आत्मबुद्ध्या कारणोपमर्द्दा
दित्यर्थः॥१४॥येनेति॥येन इदं विश्वं घटपटादि दृष्टं स तदा हि न संस्कारः कदाचिन्नघटादिकं
नास्तीति करोतु वै नास्तीति जानातु यः पश्यन्नपि न पश्यति स निर्वासनः स न किं कुरुते न पदवि
क्षेपकः संस्कारोपि नास्ति तस्य कर्तुमशक्त्वादित्यर्थः॥१५॥
का

३८॥

अयमिति॥ सर्वमात्मेति निश्चित्य अनुभूय तूष्णींभूतस्य निःसंकल्प(स्य) गावाग्व्यापारस्य पुंस इति विविधाः कल्पनाः क्षीणा भवन्ति॥ ता नीति किं अयं सोऽहमिति॥ य एवाहं पूर्वदिने वृत्तमकरवं सोऽहं यजामि अयं देवदत्तो गच्छति नाहं गमिष्यामीत्यादयः कल्पनाः क्षीणा भवन्तीत्यर्थः॥ ९॥ निवृत्तसंकल्पस्य स्वरूपमाह द्वाभ्यां॥ न विक्षेप इति॥ उपशान्तविकल्पस्य योगिनो विक्षेपो व्यग्रता न एकाग्र्यादि कम

अयं सोऽहमयं नाहमिति क्षीणा विकल्पनाः॥ सर्वमात्मेति निश्चित्य तूष्णींभूतस्य योगिनः॥ ९॥
न विक्षेपो न चैकाग्र्यं नातिबोधो न मूढता॥ न सुखं न च वा दुःखमुपशान्तस्य योगिनः॥ १०॥ स्वा
राज्ये भैक्ष्यवृत्तौ च लाभालाभे जने वने॥ निर्विकल्पस्वभावस्य न विशेषोऽस्ति योगिनः॥ ११॥
क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकता॥ इदं कृतमिदं नेति द्वन्द्वैर्मुक्तस्य योगिनः॥ १२

पि नेत्यर्थः॥ १०॥ स्वाराज्यमिति॥ स्वाराज्ये स्वर्गराज्ये भैक्ष्यवृत्तौ च परार्द्धवस्तुलाभे जने जनसमूहे विजने वने च विशेषो योगिनो नास्ति कीदृशस्य विकल्परहितस्वभावस्येत्यर्थः॥ ११॥ क्व धर्म इति॥ इदं कृतमिदं न कृतमित्यादिद्वन्द्वैर्मुक्तस्य योगिनो धर्मार्थकामाः विवेकता मोक्षोपायस्तत्त्वविवेकश्च न भवति॥ तत्स्थूलभूतविद्याकामसंकल्पादीनां विशेषादित्यर्थः॥ १२॥

अष्टा० ३९॥

भावाभावेति॥ यो बुधस्तृप्तः स्वात्मानुभवतृप्तः अत एव भावाभावस्फूर्तिविहीनः अत एव निर्वासनः तेन लोकदृष्ट्यापि कुर्वता किंचिदपि नैव स्यात्॥ अकर्त्रात्मज्ञानेन कर्तृत्वाध्यासबाधादित्यर्थः॥ १९॥ इदमेव विशदयति॥ प्रवृत्तौ वेति॥ धीरस्यात्मविश्रान्तस्य प्रवृत्तौ वा निवृत्तौ वा दुर्ग्रहः कर्तृत्वाभिमानो नास्ति॥ कीदृशस्य धीरस्य प्रारब्धवशाद्यदा यत्प्रवृत्तं वा कर्तुमायाति तत्

भावाभावविहीनो यस्तृप्तो निर्वासनो बुधः॥ नैव किंचित्कृतं तेन लोकदृष्ट्या विकुर्वता॥ १९॥
प्रवृत्तौ वा निवृत्तौ वा नैव धीरस्य दुर्ग्रहः॥ यदा यत्कर्तुमायाति तत्कृत्वा तिष्ठतः सुखं॥ २०॥
निर्वासनो निरालंबः स्वच्छन्दो मुक्तबंधनः॥ क्षिप्तः संस्कारवातेन चेष्टते शुष्कपर्णवत्॥ २१॥

त्सुखमनायासं स्यात्तथा कृत्वा तिष्ठतः अतः कर्तृत्वाभिमानाभावात् ज्ञानिनां कृतमकृतमेवेत्यर्थः॥ २०॥ ननु ज्ञानी चेन्निर्वासनस्तर्हि केन प्रयुक्तः कर्म करोतीत्याशंक्याह॥ निर्वासन इति॥ निर्वासनः अत एव निरालंबः कर्तव्याकर्तव्यानुसंधानरहितः अत एव स्वच्छन्दः रागद्वेषानधीनः यतो मुक्तबंधनः बंधहेतुज्ञानशून्यः ज्ञानी संस्कारवातेन क्षिप्तः प्रारब्धपवनेन प्रेरितः सन् शुष्क

अष्टा.
४०

कृतं देहेनेति॥ इति चिंतामनुरुध्यमानेनिरंतरं प्रयाति स कुर्वन्नपि न करोति कर्तव्याभिमानाभावा
दित्यर्थः॥२५॥ अतद्वादीति॥ जीवन्मुक्तः अतद्वादीव अहमिदं न करिष्यामीत्यवदन्नेव कार्यं कुरुते
प्रारब्धवशात् अवदन्नपि वालिशो मूर्खो न भवेत् अतत्त्वज्ञानित्वात् अत एव संसरन्नपि संसारव्य
वहारं कुर्वन्नपि अतः सुखी अत एव श्रीमान् प्रसन्नतया शोभावान्॥ अत एव शोभते दीप्यते स्व

कृतं देहेन कर्मेदं न मया शुद्धरूपिणा॥ इति चिंतानुरोधी यः कुर्वन्नपि करोति न॥२५॥
अतद्वादीव कुरुते न भवेदपि वालिशः॥ जीवन्मुक्तः सुखी श्रीमान्संसरन्नपि शोभते॥२६
नानाविचारसुश्रांतो धीरो विश्रांतिमागतः॥ न कल्पते न जानाति न शृणोति न पश्यति॥२७

प्रकाशत इत्यर्थः॥२६॥ नानेति॥ नानाविचारैर्द्वैतविचारान्सुश्रांतस्तद्वन्निर्विण्णो यतो धीरो ज्ञानी
अत एव आत्मन्येव विश्रांतिमागतः अत एव न कल्पते संकल्पादिकं मनोव्यापारं न करोति न जा
नाति॥ बुद्धिव्यापारं न करोति शब्दं न शृणोति रूपं न पश्यति॥ इंद्रियमात्रव्यापारं करोति कर्तृत्वा
भिमानाभावादित्यर्थः॥२७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

धो

येनेति॥ येन परं व्यतिरिक्तं ब्रह्म दृष्टं स अहं ब्रह्मेति चिंतयेत् यस्तु द्वितीयं न पश्यति स निश्चिंतः सन् किं
चिंतयति न किमपि चिंतयति अद्वैतीयात्मानुभवशालित्वाद्ब्रह्मचिंतनमपि नास्तीत्यर्थः॥१६॥ ज्ञा
नी निश्चिंतत्वान्निरोधोऽपि नास्तीत्याह॥ दृष्टइति॥ येनात्मविक्षेपश्चित्तादिभ्रमो दृष्टः असौ पुरुषश्चित्तनिरो
धं कुरुते विक्षेपपरिहारार्थं उदारः सर्वत्राद्वितीयात्मदर्शी तु विक्षिप्त एव नास्ति स विक्षेपपरिहा

येन दृष्टं परं ब्रह्म सोऽहं ब्रह्मेति चिंतयेत्॥ किं चिंतयति निश्चिंतो द्वितीयं यो न पश्यति॥१६॥ दृष्टो
येनात्मविक्षेपो निरोधं कुरुते त्वसौ॥ उदारस्तु न विक्षिप्तः साध्याभावात्करोति किं॥१७॥ धी
रो लोकविपर्यस्तो वर्तमानोऽपि लोकवत्॥ न समाधिं न विक्षेपं न लेपं स्वस्य पश्यति॥१८॥

रलक्षणस्य साध्यस्याभावात् किं कुरुते कथं निरोधं कुरुते इत्यर्थः॥१७॥ इदमेव द्रढयति॥ धीर इ
ति॥ धीरः अद्वितीयात्मविश्रांतो लोकविपर्यस्तः लोकेषु विक्षेपरहितः प्रारब्धवशाल्लोकव
द्वर्तमानोऽपि बाधितानुवृत्त्या व्यवहारपरोऽपि सन् अयं समाधिरयं विक्षेपस्तस्मात् अयं विक्षेप
कृतो लेप आत्मन इत्यादिकं न पश्यति चिन्मात्रदर्शित्वात्॥१८॥

४१

असमाधेरिति॥ ज्ञानी मुमुक्षुर्न भवति असमाधेः समाधेरकारणात्ततश्चायं नरो बद्धो नाविक्षेपात् हेतुः समाभावादित्यर्थः॥ कीदृशस्तर्हि ज्ञानीत्याशंक्याह॥ निश्चित्येति॥ इदं सर्वं कल्पितमिति पूर्वमेव निश्चित्य पश्चाद्बाधितानुवृत्त्या पश्यन्नपि महाशयो निर्विकारचित्तः अत एव ब्रह्मैवास्ते॥२८॥ ननु संसारं पश्यंश्चेत्कथं ब्रह्मेत्याशंक्याह॥ अहंकाराभावादित्याह॥ यस्येति॥

असमाधेरविक्षेपान्न मुमुक्षुर्न चेतरः॥ निश्चित्य कल्पितं पश्यन्ब्रह्मैवास्ते महाशयः॥२८॥
यस्यांतः स्यादहंकारो न करोति करोति सः॥ निरहंकारधीरेण न किंचिदकृतं कृतं॥२९॥
नोद्विग्नं न च संतुष्टमकर्तृ स्पंदवर्जितं॥ निराशं गतसंदेहं चित्तं मुक्तस्य शोभते॥३०॥

यस्यांतः करणेऽहंकाराध्यासः स्यात्स लोकदृष्ट्या न कुर्वन्नपि संकल्पादिकं करोति कर्तृत्वाध्यासात् निरहंकारेण अत एव धीरेण कर्तृत्वाध्यासरहितेन लोकदृष्ट्या कृतेन तथापि स्वदृष्ट्या न किंचिदपि कृतं कर्तृत्वाध्यासाभावात्॥२९॥ मुक्तचित्तं वर्णयति द्वाभ्यां॥ नोद्विग्नमिति॥ मुक्तस्य चित्तं राजते केवलप्रकाशरूपं भवयतो नोद्विग्नं उद्वेगहेतोर्द्वेषस्याभावात्। न च संतुष्टं संतोषहेत्वनुरागाभावात्॥ तथा कर्तृस्पंदवर्जितं संकल्पविकल्पशून्यं अत एव निराशं गतः

संसारसंकल्पादिशून्यस्तु सर्वदा तुष्ट एवेत्याह॥ असंसारस्येति॥ न विद्यते संसारहेतुः संकल्पो यस्य तस्य असंसारस्य हर्षादिधर्मयोन ज्ञायते अतरूर्मिरहितत्वान्नित्यं शीतलमना विदेहमुक्त इव राजते षडूर्मिरहितः शिव इति स्मृतेः॥३१॥ कुत्रापीति॥ आत्मारामस्य अत एव धीरस्य निश्चलचित्तस्य एव शीतलः अच्छतरो निर्मलतरः आत्मा मनो यस्य तस्य शीतलाच्छतरात्मनो ज्ञानिनः कु

असंसारस्य तु क्वापि न हर्षो न विषादता॥ स शीतलमना नित्यं विदेह इव राजते॥३१॥ कुत्रापि न जिहासास्ति नाशो वापि न कुत्रचित्॥ आत्मारामस्य धीरस्य शीतलाच्छतरात्मनः॥३२॥
प्रकृत्या शून्यचित्तस्य कुर्वतोऽस्य यदृच्छया॥ प्राकृतस्येव धीरस्य न मानो नावमानता॥३३॥

त्रापि जिहासा त्यागेच्छा नास्ति उपादित्सापि नास्ति रागद्वेषाभावात् नाशोपि अन्यस्यापि कुत्रापि नास्ति अनर्थहेतोरज्ञानस्याभावादित्यर्थः॥३२॥ प्रकृत्येति॥ प्रकृत्या स्वभावेन शून्यं विकाररहितं चित्तं यस्य तस्य धीरस्य आत्मविश्रांतस्य प्राकृतस्येव अज्ञानिन इव यदृच्छया प्रारब्धवशात्कुर्वतः अस्य विदुषः मानावमानता नास्तीत्यर्थः॥३३॥

[margin:] [illegible] संदेहं चित्तं मुक्तस्य [illegible] ॥३०॥

83

84

सा

अष्टा० ४१

निर्ध्यातुमिति॥ यस्य ज्ञानिनः चित्तं निर्ध्यातुमिच्छति तेन तस्यानुचेष्टितुं चेष्टितुं वापि न प्रवर्त
ते न संकल्पयति किंतु इदं ज्ञानि चित्तं निर्निमित्तं संकल्परहितं भवसन् निर्ध्यायति निश्च
लत्वरूपेण तिष्ठति तथा चेष्टते विविधाश्चेष्टाः करोति इत्यर्थः॥३१॥ ज्ञात्वा ज्ञाने नोवि[...]शे
षं वदन्नेव ज्ञानिनो विरलत्वमाह॥ तत्त्वमिति॥ मंदः अज्ञानी यथार्थं तत्त्वं पदार्थाभेदं श्रु
त्वैकाग्र्यं असंभावना विपरीतभावनाभ्यां मूढतां अविवेकं प्राप्नोति॥ अथवा शास्त्र

निर्ध्यातुं चेष्टितुं वापि यच्चित्तं न प्रवर्तते। निर्निमित्तमिदं किंतु निर्ध्यायति विचेष्टते॥ ३१॥
तत्त्वं यथार्थमाकर्ण्य मंदः प्राप्नोति मूढताम्। अथवा याति संकोचममूढः कोऽपि मूढ
वत्॥३२॥ एकाग्रता निरोधो वा मूढैरभ्यस्यते भृ[...]शम्। धीराः कृत्यं न पश्यन्ति सुप्तवत्स्व
पदे स्थिताः॥३३॥

यी साक्षात्कारायसंकोचं चित्तसमाधिमायाति कोऽपि सहस्रेषु एक अन्तरसंमूढोऽपि बाह्यमत्या
मूढवत् बहिर्व्यवहारकर्ता भवति॥३२॥ अथवा याति संकोचमित्यनेन एकाग्रतानिरो
धौ द्योतयति॥ एकाग्रतेति॥ एकाग्रता एकलक्ष्ये चित्तं [...] ता अथवा निरोधश्चित्तवृत्तिलयो
मूढैरनुत्पन्नसाक्षात्कारैर्विपरीतभावनाभिः [...] भृशमत्यर्थमभ्यस्यते तत्त्वज्ञ वस्तुदृष्ट्वा वाब
देहात्मधीराहित्येन स्वपदे स्वरूपे स्थिताः धीराः ज्ञानिनः सुप्तवत्किमपि कृत्यं न पश्यन्ति॥

अष्टा० ४२

मूढ इति॥ मूढः अज्ञानी यत्नस्थित्तनिरोधादेव ब्रह्म भवितुमिच्छति तेन तद्ब्रह्म नाप्नोति अज्ञान
स्यानिष्पन्नत्वादित्यर्थः निश्चितं॥ धीरो ज्ञानी अनिच्छन्नपि मोक्षमनिच्छन्नपि परब्रह्मतद्रूपभा
क् भवधायका ज्ञानस्यनिष्पन्नत्वादित्यर्थः॥३७॥ एतदेव स्पष्टयति॥ निराधार इति॥ मूढस्य
ज्ञानिनस्तु निराधाराग्रहव्यग्राः केवलेन चित्तनिरोधेन वाहं मोक्ष्यामीति निष्कारणादुरा

मूढो नाप्नोति तद्ब्रह्म यतो भवितुमिच्छति। अनिच्छन्नपि धीरो हि परब्रह्मस्वरूपभाक्॥३७
निराधारा ग्रहव्यग्रा मूढाः संसारपोषकाः। एतस्यानर्थमूलस्य मूलच्छेदः कृतो बुधैः॥३८
न शान्तिं लभते मूढो यतः शमितुमिच्छति। धीरस्तत्त्वं विनिश्चित्य सर्वदा शान्तमानसः॥३९

ग्रहव्यग्राः प्रत्युत संसारपोषकाः संसारनिवर्तकाज्ञानपराङ्मुखत्वात् बुधैर्ज्ञानिभिरनर्थ
मूलस्य मूलच्छेदः कृतः संसारमूलभूतस्याज्ञानस्य ज्ञानेन निवर्तकत्वात्॥३८॥ न शान्तिमि
ति॥ मूढः अज्ञानी यत्नस्थित्तनिरोधादेः शमितुमिच्छति तेन शान्तिं न लभते धीरो विवेकी त
त्त्वं विनिश्चित्य शमितुमनिच्छन्नपि स्वभावादेव सर्वदा शान्तमानसो भवति॥ चेतोविकारहे

निरोधस्य किंचित्करत्वमित्याह ॥ अप्रयत्नादिति ॥ मूढः पुरुषः अप्रयत्नाच्चित्तनिरोधात्प्रयत्ना त्कर्मानुष्ठानाद्वा निर्वृतिं परमसुखं न प्राप्नोति आनंदहेतोरात्मानंदानुभवादित्यर्थः प्राज्ञस्तु स माधिं वा कर्म वाप्यकुर्वन् तत्त्वनिश्चयमात्रेण कृतार्थो भवति दुःखहेतोरज्ञानस्य ज्ञानदग्धत्वा दित्यर्थः ॥३४॥ ननु मूढस्य योगाभ्यासादात्मानुभवो न विद्यत इत्याशंक्येत्याह ॥ शुद्धमिति ॥

अप्रयत्नात्प्रयत्नाद्वा मूढो नाप्नोति निर्वृतिं ॥ तत्त्वनिश्चयमात्रेण प्राज्ञो भवति निर्वृतः ॥३४॥
शुद्धं बुद्धं प्रियं पूर्णं निष्प्रपंचं निरामयं ॥ आत्मानं तं न जानंति तत्राभ्यासपरा जनाः ॥३५॥
नाप्नोति कर्मणा मोक्षं विमूढोऽभ्यासरूपिणा ॥ धन्यो विज्ञानमात्रेण मुक्तस्तिष्ठत्यविक्रियः ॥३६॥

तत्र जागर्ति अभ्यासपरा जना अजानंत आत्मानं तं न जानंति कीदृशं शुद्धं मायामलातीतं अत एव बुद्धं स्वप्रकाशं प्रियं सुखस्वरूपं पूर्णं यतो निष्प्रपंचं अत एव निरामयं दुःखसंबंधरहितमि त्यर्थः ॥३५॥ इदमेव विवृणोति ॥ नाप्नोतीति ॥ मूढोऽनात्मज्ञः अभ्यासरूपिणा योगाभ्यासात्म केन कर्मणा मोक्षं नाप्नोति न कर्मणा न प्रजया धनेनेति श्रुतेः ॥ धन्यो भाग्यवान् विरलो विज्ञा न मात्रेण ... विद्या कामकर्मोऽन एव मुक्तस्तिष्ठति ॥३६॥ मुमुक्षुरपि मूढो ब्रह्म

अष्टा० ४३॥

न किंचिदपि चिंतयेदिति भगवद्वचनं सिद्धांतमभिप्रेत्याह ॥ शुद्धमिति ॥ कुबुद्धयो मूढबुद्धय एव शुद्धं निर्मलं अद्वयं द्वैतवर्जितमात्मानं मननशीलं व्यापकं भावयंति ॥ चिंतयंति न तु जानंति साक्षात्कुर्वंति कुतः संमोहात् ॥ निर्मलत्वस्य कल्पितमलसापेक्षत्वादद्वयस्य कल्पितद्वैतसापेक्षत्वात् ॥ आत्मत्व स्य च कल्पितानात्मसापेक्षत्वात्सापेक्षरूपचिंतनेन न तु मोहनिवृत्तेः ॥ यतो न जानंति अत एव या वज्जीवमनिर्वृताः परमसंतोषरहिताः संतोषस्य ज्ञानैकलभ्यत्वादित्यर्थः ॥४३॥

शुद्धमद्वयमात्मानं भावयंति कुबुद्धयः ॥ न तु जानंति संमोहाद्यावज्जीवमनिर्वृताः ॥४३॥
मुमुक्षोर्बुद्धिरालंबमंतरेण न विद्यते ॥ निरालंबैव निष्कामा बुद्धिर्मुक्तस्य सर्वदा ॥४४॥

इदमेव विषदय ति ॥ मुमुक्षोरिति ॥ मुमुक्षोरनधिगतात्मसाक्षात्कारस्य बुद्धिः सविशेषालंबनमं तरेण न विद्यते साक्षात्काराभावात् मुक्तस्य जीवन्मुक्तस्य अत एव मुक्तावपि निष्कामा बुद्धिः सर्व दा निरालंबैव निर्विशेषा आत्मानुभवरूपैव सविषयादिपरित्यागः एवात्मानुभवः ॥४४॥ नि रोधोऽपि विषयस्फूर्तिं च किं तेरेवानुष्ठीयते न तु विज्ञैरित्याह ॥ ॥ ॥ ॥ ॥

४३

88

क्वात्मन इति॥ यद्दृष्टं यस्य दृष्टं ज्ञानेऽवलंबते दृश्यं विषयीकरोति॥ तस्य आत्मनो दर्शनं क्व
न क्वापीत्यर्थः धीरा ज्ञानिनस्तं तं निमित्तप्रदीपनादिकं दृश्यपदार्थं न पश्यंति किंतु चिद्रूपमात्मा
नं पश्यंति॥४०॥ क्वेति॥ यः अज्ञानमुमुक्षुः चित्तनिरोधे निर्बंधं करोति तस्य विमूढस्य क्व चित्तनि
रोधो न क्वापि अज्ञानिनां समाध्यपगमे पुनश्चित्तप्रसरात्स्वारामस्य आत्मारामस्यैव अतएव

क्वात्मनो दर्शनं तस्य यद्दृष्टमवलंबते॥ धीरास्तं तं न पश्यंति पश्यंत्यात्मानमव्ययं॥४०
क्व निरोधो विमूढस्य यो निर्बंधं करोति वै॥ स्वारामस्यैव धीरस्य सर्वदासावकृत्रिमः॥४१
भावस्य भावकः कश्चिन्न किंचिद्भावकोऽपरः। उभयाभावकः कश्चिदेवमेव निराकुलः॥४२

निश्चलचित्तस्य सर्वदासौ चित्तनिरोधः अकृत्रिमः स्वाभाविकः सर्वदा स्वानुभवशालीनत्वा
त्॥४१॥ भावस्येति॥ कश्चिन्नार्किकादिर्भावस्य भावकः भावरूपपरमार्थः सत्प्रपंच इति
भावयतीति मन्यते इति भावकः॥ अपरः शून्यवादी बौद्धो न किंचिदस्तीति भावयतीति न किंचिद्भाव
कः कश्चि[illegible] कश्चि[illegible]स्वानुभवशाली उभयाभावकः सन् एवमेव उभयीभावनेनैव

वस्त्विति॥ वस्तुनश्चिदात्मनः श्रवणमात्रेण ज्ञातायाम् शुद्धबुद्धिः आत्म[illegible]

अष्टा० तो निराकुलः स्वस्वरूपस्थः पुरुषः आचारं क्रियानुष्ठानं अनाचारं नैष्कर्म्यं उभयत्रापि
४४॥ तटस्थं वा एतत्त्रयमपि नैव पश्यति आत्मस्थत्वादित्यर्थः॥४८॥ यदेति॥ यदा यच्छुभं नैष्क
र्म्यं वा अशुभं अकर्म वा कर्तुमायाति तदा लोकदृष्ट्या प्रारब्धवशात्कुरुते ऋजुः रागद्वेषरहितः

89

वस्तुश्रवणमात्रेण शुद्धबुद्धिर्निराकुलः॥ नैवाचारमनाचारमौदास्यं वा प्रपश्यति॥४८
यदा यत्कर्तुमायाति तदा तत्कुरुते ऋजुः॥ शुभं वाप्यशुभं वापि तस्य चेष्टा हि बालवत्
४९॥ स्वातंत्र्यात्सुखमाप्नोति स्वातंत्र्याल्लभते परं। स्वातंत्र्यान्निर्वृतिं गच्छेत्स्वातंत्र्यात्परमं
पदं॥५०॥

हि यतः कारणात्॥ तस्य चेष्टा बालवत् प्रारब्धमात्रायत्ता रागद्वेषानधीना॥४९॥ स्वातंत्र्या
दिति॥ स्वातंत्र्यात् रागद्वेषानाधीनत्वात्सुखं मनःप्रसादमाप्नोति॥ यतः स्वातंत्र्यात्परं ज्ञानं प्रा
प्नोति॥ तथा स्वातंत्र्यान्निर्वृतिं नित्यसुखं गच्छेत् प्राप्नुयात् अत एव स्वातंत्र्यात्परमं पदं स्वरू
पं विश्रांतिं गच्छेत्॥ ॥५०॥ ॥

४४॥

90

विषयेति॥ विषयद्वीपिनो विषयव्याघ्रान् वीक्ष्य शार्दूलद्वीपिनो व्याघ्र इत्यमरः॥ भीताः शरणा
र्थिनः स्वात्मरक्षणार्थिनो मूढा एव निरोधसिद्धये एकाग्रत्वसिद्धये वा झडिति शीघ्रं क्रो
डं कंदरां तनःप्रदेशं तितन तु ज्ञानिन इत्यर्थः॥४५॥ वासनात्याग एव विषयभयनिवृत्तिहेतुरित्या
ह। निर्वासनेति॥ निर्वासनं यः पुरुषस्तद्रूपं हरिं सिंहं दृष्ट्वा विषयदन्तिनो न सक्ताः सन्तस्तूष्णीं

विषयद्वीपिनो वीक्ष्य चकिताः शरणार्थिनः॥ विशन्ति झडिति क्रोडं निरोधैकाग्र्यसिद्धये॥४५
निर्वासनं हरिं दृष्ट्वा तूष्णीं विषयदन्तिनः॥ पलायन्ते न शक्तास्ते सेवन्ते कृतचाटवः॥४६
न मुक्तिकारिकां धत्ते निःशंको युक्तमानसः॥ पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नास्ते यथा
सुखं॥४७॥

मौनं यथा स्यात्तथा पलायन्ते कृतचाटवः कृतप्रियवचना एवं तं निर्वासनं द्वीपिनं इश्वराः [illegible]
स्वयमागत्य सेवन्ते इत्यर्थः॥४६॥ नमुक्तीति॥ निःशंको गतसंशयः अत एव युक्तमानसो निश्च
लमानसः ज्ञानी मुक्तिकारिकां यमनियमादिक्रियां आग्रहात्त्र धत्ते किं तर्हि कर्त्तत्वाध्यास
रहितत्वा[illegible] लोकदृष्ट्या ईक्षणादिक्रियां कुर्वन्नास्ते इत्यर्थः॥४७॥

अष्टा० ४५

श्रोत्रियमिति॥ धीरस्य ज्ञानिनः श्रोत्रियं देवतां तीर्थं पूजनेन सति हृदि कापि वासना धर्माधर्मका
मवासना न जायते भूपतिं प्रियं पुत्रादिकं च दृष्ट्वा कापि काम्यपदार्थवासना न जायते सर्वे
त्र समबुद्धित्वादित्यर्थः॥५४॥ भृत्यैरिति॥ भृत्यादिभिर्विहस्य उपहस्य धिक्कृत तिरस्कृतो
योगी मनाक् किंचिदपि विकृतिं चित्तक्षोभं न याति रागद्वेषहेतोर्मोहस्याभावादित्यर्थः॥५५॥

श्रोत्रियं देवतां तीर्थमंगनां भूपतिं प्रियं दृष्ट्वा संपूज्य धीरस्य न कापि हृदि वासना॥५४॥ भृत्यैः
पुत्रैः कलत्रैश्च दौहित्रैश्चापि गोत्रजैः॥ विहस्य धिक्कृतो योगी न याति विकृतिं मनाक्॥५५
संतुष्टोपि न संतुष्टः खिन्नोपि न च खिद्यते॥ तस्याश्चर्यदशां तां तां तादृशा एव जानते॥५६
कर्तव्यतैव संसारो न तां पश्यन्ति सूरयः॥ शून्याकारा निराकारा निर्विकारा निरामयाः॥५७॥

91

संतुष्ट इति॥ लोकदृष्ट्या संतोषादियुक्तोपि वस्तुतस्तद्रहितस्तस्य ज्ञानिनस्तां तां आ[illegible]श्चर्यदशां
तादृशा एव ज्ञानिन एव जानते॥५६॥ कर्तव्यतैवेति॥ कर्तव्यतैव ममेदं कर्तव्यमिति कार्यसं
कल्प एव संसारस्तद्धेतुत्वात्॥ सूरयो ज्ञानिनस्तां कर्तव्यतां न पश्यन्ति न संकल्पयन्ति सं
कल्पमात्ररहितत्वात् कीदृशाः सूरयः शून्यसर्वकार्यदेयेन यावन्मानघटाद्याकारे
तथा निराकारे च व्याकृते निर्विकाराः समात्मदर्शिनः अत एव निरामयाः संकल्पोपप्लवरहिता इत्यर्थः॥

४५

अकर्तृत्वमिति॥ यदा स्वात्मनः अकर्तृत्वं मन्यते अभोक्तृत्वं च मन्यते तदा समस्ताश्चित्तवृत्तयः क्षीणा भवन्त्येव॥ अमुकं कर्माहं करिष्यामि अमुकं कर्माहं कारयिष्यामि अमुकं मे भोग्यं भवत्वित्यादि चित्तवृत्त्यनुदयेन उत्पन्नानामप्यासामपि चित्तवृत्तीनामनुदयादित्यर्थः॥५७॥ उच्छृङ्खलेति॥ धीरस्य वीतस्पृहस्य अकृतका अकृत्रिमा उच्छृङ्खलापि शान्तिरहितापि स्थि

अकर्तृत्वमभोक्तृत्वं स्वात्मनो मन्यते यदा॥ तदा क्षीणा भवन्त्येव समस्ताश्चित्तवृत्तयः॥५८॥ उच्छृङ्खलाप्यकृतिका स्थितिर्धीरस्य राजते॥ न तु सस्पृहचित्तस्य शान्तिर्मूढस्य कृत्रिमा॥५९॥ विलसन्ति महाभोगैर्विशन्ति गिरिगह्वरान्॥ निरस्तकल्पना धीरा अबद्धा मुक्तबुद्धयः॥६०॥

तिः शोभते सस्पृहचित्तस्य मूढस्य तु कृत्रिमा शान्तिर्न शोभते इत्यर्थः॥५९॥ निरस्तकल्पना इति शोभते सस्पृहचित्तस्य मूढस्य तु कृत्रिमा शान्तिर्न शोभते इत्यर्थः निरस्तकल्पनानां ज्ञानिनां तु भोगत्यागयोरप्यनाग्रह इत्याह॥ विलसन्तीति॥ निरस्तकल्पना धीरा ज्ञानिनः कदाचित् प्रारब्धवशात् महाभोगैर्विलसन्ति क्रीडन्ति॥ कदाचित् प्रारब्धवशात् गिरिगह्वरान् विशन्ति॥ कीदृशा अबद्धा आसक्तिरहिताः यतो मुक्तबुद्धयः

कर्तृत्वाभिमानरहितस्य ... स्थिः॥६०॥

अष्टा०
४६

निवृत्तिरिति॥ लोकदृष्ट्या प्रतीयमानापि मूढस्य बाह्येन्द्रियव्यापाराणां निवृत्तिः प्रवृत्तिरूपैव जायते अहंकाराद्यनिवृत्तत्वात् धीरस्य ज्ञानिनो लोकदृष्ट्या प्रारब्धवशात्प्रतीयमानापि प्रवृत्तिरपि निवृत्तिफलभागिनी मुक्तिपर्यवसायिनी स्यात् देहाभिमानाभावादित्यर्थः॥६१॥ परिग्रहेष्विति॥ मूढस्य देहाभिमानिनः तत्संबन्धितया परिगृहीतेषु परिग्रहेषु धन

निवृत्तिरपि मूढस्य प्रवृत्तिरुपजायते॥ प्रवृत्तिरपि धीरस्य निवृत्तिफलभागिनी॥६१॥ परिग्रहेषु वैराग्यं प्रायो मूढस्य दृश्यते॥ देहे विगलिताशस्य क्व रागः क्व विरागता॥६२॥ भावनाभावनासक्ता दृष्टिर्मूढस्य सर्वदा॥ भाव्यभावनया सा तु स्वस्थस्यादृष्टिरूपिणी॥६३॥

वेश्मादिषु प्रायो बाहुल्येन वैराग्यं दृश्यते॥ देहे विगलिताशस्य तत्संबन्धिनि कुत्र गृहादौ रागः स्यात् क्व च शत्रुव्याघ्रादौ विरागः स्यात् देहे रागविरागयोरभावेन तत्संबन्धिषु रागविरागयोर्वस्तु मशक्यत्वात्॥६२॥ भावनेति॥ मूढस्य दृष्टिः सर्वदा भावनायां अभावनायां वा आसक्ता अहं भावनां करोमि अहमभावनां करोमीत्यहंकारात् स्वस्थस्यात्मनिष्ठस्य तु सा दृष्टिः भाव्यभावनया दृष्टिचिन्तया उपलक्षितापि अदृष्टिरूपिणी दृश्यदर्शनरहितरूपैव स्यात्॥ अहंकारा

मूढस्याभिमानाभावादित्यर्थः॥६३॥

अकुर्वन्नपीति॥ अकुर्वन्नपि मूढधीः सर्वत्र मूर्त्ताकारनिराकारेषु संक्षोभात्संकल्पाद्व्य
ग्रो भवति लोके हे छात्र कृत्यानि कुर्वन्नपि कुशलो विद्वान्हि निश्चितं निराकुलः निश्चल
चित्तः आत्मारामत्वात्॥५८॥ सुखमिति॥ प्राक्तनवशाद्व्यवहारेपि जायमाने शांतधीरात्म
निष्ठबुद्धिर्विद्वान् आस्ते सुखमनंति कुत्रापि वास्ते उपविशति शेते आगच्छति वक्ति भुंक्ते स

अकुर्वन्नपि संक्षोभाद्व्यग्रः सर्वत्र मूढधीः॥ कुर्वन्नपि तु कृत्यानि कुशलो हि निराकुलः॥५८
सुखमास्ते सुखं शेते सुखमायाति याति च॥ सुखं वक्ति सुखं भुंक्ते व्यवहारेपि शांतधीः
५९॥ स्वभावाद्यस्य नैवार्त्तिर्लोकवद्व्यवहारिणः॥ महाहृद इवाक्षोभ्यो गतक्लेशः सुशो
भते॥६०॥

वैद्रियव्यापारं कुरुत इत्यर्थः॥५९॥ ननु ज्ञानिनोपि व्यवहारेषु कथं न खेद इत्यत आह॥
स्वभावादिति॥ व्यवहारिणोपि यस्य ज्ञानिनो लोकवत्प्राकृतजनवत् आर्त्तिः खेदो न
जायते कुतः स्वभावात्स्वात्मानंदस्य स्वभावात्स्वमाहात्म्यादित्यर्थः॥ स गतक्लेशो
ज्ञानी महाहृद इवाक्षोभ्यो निर्विकारः सुशोभते॥६०॥

सजयतीति॥ सअर्थसंन्यासी हृष्टादृष्टप्रयोजनसंन्यासी यतः पूर्णस्वभावो विग्रहः स्वरूपं यस्य सपूर्ण
स्वरसविग्रहो जयति सर्वोत्कर्षेण वर्त्तते॥ सकः यस्याकृत्रिमः स्वाभाविकः अनवच्छिन्ने पूर्ण
स्वरूपे समाधिर्यस्य वर्त्तते स जयतीत्यर्थः॥६१॥ ज्ञाततत्त्वस्य तु सर्वत्र निराकांक्षत्वमेव मुख्यं
लक्षणमित्याह॥ बहुनेति॥ अत्र ज्ञानिनि बहुनोक्तेन लक्षणेन किं प्रयोजनं॥ ज्ञाततत्त्वो महा

सजयत्यर्थसंन्यासी पूर्णस्वरसविग्रहः॥ अकृत्रिमोनवच्छिन्ने समाधिर्यस्य वर्तते॥६१॥ ब
हुनात्र किमुक्तेन ज्ञाततत्त्वो महाशयः॥ भोगमोक्षनिराकांक्षी सदा सर्वत्र नीरसः॥६२॥
महदादि जगद्द्वैतं नाममात्रविजृंभितं॥ विहाय शुद्धबोधस्य किं कृत्यमवशिष्यते॥६३॥

शयः भोगमोक्षफलयोर्निराकांक्षी अत एव सदा सर्वत्र भोगमोक्षसाधनेषु नीरसः निरनुरागः
६२॥ महदिति॥ महदादि महदहंकारपंचतन्मात्रपंचमहाभूतभौतिकजगल्लक्षणं द्वैतं नाम
मात्रेणैव विजृंभितं विभिन्नमिव भातं न तु वास्तवं॥ अत एव तत्रकल्पनां विहाय स्थितस्य अत
एव शुद्धबोधस्य स्वप्रकाशचिन्मात्रस्वरूपस्य किं कृत्यमवशिष्यते॥ सच्चिदानंदाधिगमेनेव कृ
तकृत्यत्वादिति भावः॥६३॥ ननु जथापि अत्र न यशांत्यर्थं प्रयत्नः कर्तव्य इत्याह॥ ॥ ॥॥

नन्वहृदृष्टभावनेक्रिय माणेपिन नहृष्टिर्नेकर्षं स्पृशलं विनीत्याशंकानिष्कामत्वादित्याह सर्वारंभेष्विति॥ यो बालवन्निष्कामः सन्प्राक्तनवशात्सर्वारंभेचरति प्रवर्तते तस्य शुद्धस्या हंकारमलवर्जितस्य कर्मणि क्रियमाणे न लेपो न कर्तृत्वाभिमानो हंकाराभावादित्य र्थः॥६४॥ एवंविधो निधन्य इत्याह॥ स एवेति॥ स आत्मज्ञ एव धन्यो नान्योयः सर्वारं

सर्वारंभेषु निष्कामो यश्चरेद्बालवन्मुनिः॥ न लेपस्तस्य शुद्धस्य क्रियमाणेपि कर्मणि॥ ६४॥ स एव धन्य आत्मज्ञः सर्वभावेषु यः समः॥ पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्निस्त र्षमानसः॥६५ क्व संसारः क्व चाभासः क्व साध्यं क्व च साधनं॥ आकाशस्येव धीरस्य निर्विकल्पस्य सर्वदा॥६६॥

मा

भेषु समबुद्धिरत एव निस्तर्षमानसो विरक्तचित्तो भवति किं कुर्वन्पश्यन्शृण्वन्स्पृशन्जिघ्र न्नश्नन्॥६५॥ तस्यैवंविधस्य मुक्तिमाह॥ क्वेति॥ धीरस्य ज्ञानिनः अत एव सर्वदा विकल्परहितस्य॥ संसारप्रपंचः क्व॥ अत एव तत्प्रतिभासश्च क्व। अत एव साध्यं स्वर्गादिकं क्व॥ अत एव

साधनं योगादिकं क्व॥६६॥

अस्तयमिति॥ अस्तयं अविनाशिनं अत एव संतापरहितमात्मानं पश्यतो मुनेः क्व विद्या क्व वा॥ विश्वं कायवचनादि विद्या विश्वादेः स्फुरणादि

अष्टा०

रित्यर्थः॥ क्व च वा विश्वं क्व च देहः अहं ममेति वा क्व आत्मातिरिक्तस्य विद्याविश्वादेः स्फुरणादि रित्यर्थः॥७४॥ आत्मज्ञस्य हेतानर्थनिवृत्तिरित्युक्तं अज्ञस्य तु चित्तनिरोधादीन्यपि कर्माणि कुर्व

४८

न्तमित्यर्थः॥ यस्तु यदि जडधीश्चित्तनिरोधादीनि जहाति तर्हि अ रंशो च प्रायाणीत्याह॥ निरोधादीनीति॥

अस्तयं गतसंतापमात्मानं पश्यतो मुनेः॥ क्व विद्या क्व च वा विश्वं क्व देहोऽहं ममेति वा॥७४॥ निरोधादीनि कर्माणि जहाति जडधीर्यदि॥ मनोरथान्प्रलापांश्च कर्तुमाप्नोत्यतत्क्षणात्॥७५ मंदः श्रुत्वापि तद्वस्तु न जहाति विमूढतां॥ निर्विकल्पो बहिर्यत्नादन्तर्विषयलालसः॥७६

तत्क्षणादस्मादेव अारभ्य मनोरथान्प्रलापान्लक्षणया सर्वव्यापारान्कर्तुमाप्नोति प्रवर्तते॥ तथा च मूढस्य चित्तनिरोधादिकमपि किंचित्करमित्यर्थः॥७५॥ मूढस्यात्मश्रवणमप्यनर्थक मित्याह॥ मंद इति॥ मंदो मूढ विमलदात्मवस्तु श्रुत्वापि विमूढतां न जहाति मलिनचित्तस्य श्रव णादपि ज्ञानानुदयात्॥ अत एव मूढः यत्नात् बहिर्दृष्ट्या निर्विकल्पोपि अंतर्मनसि विषयलो लुपो भवतीत्यर्थः॥७६

४८

९८

भ्रमभूतमिति॥ अधिष्ठानसाक्षात्कारे सति इदं सर्वं भ्रमभूतं भ्रमेणैव कल्पितं अत एव इदं किंचि
त्किमपि वास्तवं नास्तीति निश्चयी॥ अलक्ष्यस्फुरणः यस्मिन्नात्र प्रतिभासवान्॥ अत एव शुद्धः
स्वरूपसाक्षात्कारेणाबाधितावद्यमलत्वात्स्वभावेनैव शान्तो न तु यत्नान्तरं ज्ञानातिरिक्तम
पेक्ष्यमित्यर्थः॥७०॥ शुद्धेति॥ शुद्धस्फुरणरूपस्य स्वप्रकाशचिद्रूपस्य अत एव दृश्यभावं दृश्यप

भ्रमभूतमिदं सर्वं किंचिन्नास्तीति निश्चयी॥ अलक्ष्यस्फुरणः शुद्धः स्वभावेनैव शाम्यति॥७०॥
शुद्धस्फुरणरूपस्य दृश्यभावमपश्यतः॥ क्व विधिः क्व च वैराग्यं क्व त्यागः क्व शमोपि वा॥७१॥
स्फुरतोनन्तरूपेण प्रकृतिं च न पश्यतः॥ क्व बंधः क्व च वा मोक्षः क्व हर्षः क्व विषादिता॥७२॥ बुद्धि
पर्यंतसंसारे मायामात्रं विवर्तते॥ निर्ममो निरहंकारो निष्कामः शोभते बुधः॥७३॥

दार्थमपश्यतः क्व च कुत्र कर्मणि विधिः क्व केषु वा विषयेषु वैराग्यं क्व केषु पदार्थेषु त्यागः क्व के
भ्यः पदार्थेभ्यः शमोपि वा कार्यो हि दृश्यपदार्थस्यैवास्फुरणादित्यर्थः॥७१॥ स्फुरतेति॥ चिद्रूपेणा
प्रकाशमानस्य बंधादिकं नास्तीत्यर्थः॥७२॥ बुद्धीति॥ बुद्धिरात्मज्ञानमेव पर्यंतो नाशो यस्य तस्मि
न्संसारे मायामात्रं मायासंवलितं चैतन्यं विवर्तते अनात्मिकं जगदाकारं प्राप्नोति॥ अतो बुधो वि
वेकवान् अनात्मिके शरीरादौ निरहंकारः सन् तत्संबंधि
षु कलत्रादौ निर्ममः अत एव निष्कामः अत एव शो
भते दीप्यते कामानामनभिमानत्वात्॥७३॥

अष्टा० ५०

सर्वत्रेति॥ सर्वत्र सर्वेषु विषयेषु अनवधानस्य एकाग्रतारहितस्य तस्य वासना कापि हृदि न मुक्तात्म
नः कर्तृत्वाद्यध्यासरहितात्मनः अत एवात्मानंदेन विशेषेण तृप्तस्य केन तुलना जायते॥ आ
निर्वासनातिरिक्तस्य द्वैतदृश्यस्याभावादित्यर्थः॥८९॥ अतुलनामेव विशेषेण विशदयति॥ जानन्नि
ति॥ निर्वासनात्तत्त्वज्ञानिनः ऋते अन्यः कः लोकदृष्ट्या मनसा जानन्नपि वस्तुतो न जानाति॥
तथा चक्षुषा पश्यन्नपि वस्तुतो न पश्यति॥ ब्रुवन्नपि न च ब्रूते कर्तृत्वाभिमानाभावादित्यर्थः ९०

सर्वत्रानवधानस्य न किंचिद्वासना हृदि॥ मुक्तात्मनो वितृप्तस्य तुलना केन जायते॥८९॥
जानन्नपि न जानाति पश्यन्नपि न पश्यति॥ ब्रुवन्नपि न च ब्रूते कोन्यो निर्वासनादृते॥९०॥
भिक्षुर्वा भूपतिर्वापि यो निष्कामः स शोभते॥ भावेषु गलिता यस्य शोभनाशोभना मतिः॥९१॥
क्व स्वाच्छंद्यं क्व संकोचः क्व वा तत्त्वविनिश्चयः॥ निर्व्याजार्जवभूतस्य चरितार्थस्य योगिनः॥९२

भिक्षुरिति॥ यस्य ज्ञानिनः उत्कृष्टेषु भावेषु शोभना अपकृष्टेषु अशोभनत्वावगाहिनी मतिर्गलि
ता स एव यो निष्कामः स भूपतिर्वा याज्ञवल्क्यादिवत् शोभते एव भावेषु निर्विकल्पत्वाद्द्वा
न्द्वं न तस्य न बाधायेत्यर्थः॥९१॥ क्वेति॥ योगिनो निर्व्याजं निष्कपटं यदार्जवं ऋजुबुद्धिस्तद्रूपस्य आ
त्मनि धृत्वा चरितार्थस्य अन्वर्थं नाम्नः स्वाच्छंद्यं स्वेच्छाचारित्वं क्व॥ तथा संकोचः प्रवृत्त्यादि
संकोचः क्व तत्त्वनिश्चयः क्व कर्तृत्वं वा क्व कर्तृत्वाध्यासाभावात् अत एव निर्व्याजं यदार्जवं ऋजुबु
द्धिभावस्तद्रूपस्य॥९२॥

९९

तुष्टिरिति॥ धीरस्य ज्ञानिनो यथापतितेन यथाप्राप्तेन वर्तनेन तिष्ठतेन स्य यथापतितवर्तिनः सर्वत्र
प्रारब्धप्राप्तेः सद्वस्तुन्यसद्वस्तुनि च तुष्टिरात्मतोष एव॥ तथा स्वच्छंदं अनपेक्षितं प्रारब्धवशा
त्देशान् देशाद्विचारितः यत्र वने वा नगरे वा सूर्योऽस्तमितः तत्रैव शायिनः शयनं कुर्वतः॥८५
पतत्विति॥ देहः पततु म्रियतां वा अथवा उदेतु जीवतु उभयथापि अस्य ज्ञानिनश्चिंता न भव

तुष्टिः सर्वत्र धीरस्य यथापतितवर्तिनः॥ स्वच्छंदं चरतो देशान्यत्रास्तमितशायिनः॥८५॥ पत
तूदेतु देहो वा नास्य चिंता महात्मनः॥ स्वभावभूमिविश्रांतिविस्मृताशेषसंसृतेः॥८६॥
अकिंचनः कामचारो निर्द्वंद्वश्छिन्नसंशयः॥ असक्तः सर्वभावेषु केवलो रमते बुधः॥८७
निर्ममः शोभते धीरः समलोष्टाश्मकांचनः॥ सुभिन्नहृदयग्रंथिर्विनिर्धूतरजस्तमः॥८८॥

ति॥ कीदृशस्य स्वभावो नाम निजात्मस्वरूपं स एव भूमिस्तत्र विश्रांत्या विस्मृतमशेषं संसारस्य
॥८६॥ अकिंचन इति॥ केवले निर्विकारो बुधो रमते कीदृशः अकिंचनः नास्ति किंचित्परि
गृहीतं यस्य सः अकिंचनः॥ अत एव कामचारो विधिनिषेधाघकिंचित्करः॥ स्वच्छंदचारी अत ए
व निर्द्वंद्वः सुखदुःखादिशून्यः छिन्नसंशयः छिन्नः संशयः यस्य सः सर्वेषु भावेषु विषयेषु असक्तः
संगशून्यः॥८७॥ निर्मम इति॥ धीरो ज्ञानी शोभते दीप्यते यतो निर्ममः अत एव समलोष्टाश्मकां

अष्टा०
५२॥
ते

ज्ञानिनश्चित्तं तु प्रार्थनानुतापादिविकाररहितत्वात् अमृतेनैव परमानंदेनैव पूरितमित्याह॥ नैवे
ति॥ लाभं न प्रार्थयते अलाभेन सुवर्णादिलाभेन वा नानुशोचति॥ अत एव धीरस्य चित्तं अमृतेनै
व परमानंदेन पूरितं सत् शीतलं आध्यात्मिकादितापरहितमित्यर्थः॥८१॥ उक्तमप्रायमेवार्थं पुनः
पुनर्भंग्यंतरेण विशेषणावर्णयति॥ ज्ञानिदशायाः सर्वोत्कृष्टत्वख्यापनाय न शांतमिति॥ निष्कामो

नैव प्रार्थयते लाभमलाभेनानुशोचति॥ धीरस्य शीतलं चित्तममृतेनैव पूरितं॥८१॥ न शां
तं स्तौति निष्कामो न दुष्टमपि निंदति॥ समदुःखसुखस्तृप्तः किंचित्कृत्यं न पश्यति॥८२॥
धीरो न द्वेष्टि संसारमात्मानं न दिदृक्षति॥ हर्षामर्षविनिर्मुक्तो न मृतो न च जीवति॥८३॥ निः
स्नेहः पुत्रदारादौ निष्कामो विषयेषु च॥ निश्चिंतः स्वशरीरेऽपि निराशः शोभते बुधः॥८४

विद्याकामकर्महीनो ज्ञानी शांतं शांत्यादिसत्त्वगुणायुक्तं स्तौति नापि दुष्टं निंदति॥ तृप्तः सन् समदुः
खसुखो भवति निष्कामत्वात् किंचित्कृत्यं न पश्यति॥८२॥ धीर इति॥ धीरो ज्ञानी संसारं न द्वेष्टि
संसारादर्शित्वात् बाधितानुसंधानाद्वा तथा आत्मानं न दिदृक्षति॥ अवाप्तसाक्षात्कारत्वात्॥ अ
त एव हर्षामर्षविनिर्मुक्तः तथा जीवनमरणादिरहितः सदैकरूपत्वादित्यर्थः॥८३॥ निःस्नेह इति॥
निराशो बुधः शोभते दीप्यते कीदृशः पुत्रदारादौ निःस्नेहः प्रीतिरहितः विषयेषु निष्कामः भोगेच्छा

ज्ञानी तु लोकदृष्ट्यापि कर्मकुर्वाणोप्यकर्तेत्याह॥ ज्ञानादिति॥ यो ज्ञानाद्गलितकर्मा गलितक्रियाध्या सः स लोकदृष्ट्या कर्म कुर्वदपि किंचन कर्तुमेव अवसरं नाप्नोति अहं कर्म करिष्यामीति वक्तुमपि अवसरं नाप्नोति कर्मावसरस्तु दूरे आस्तामिति भावः॥७७॥ विद्वांस्तु तमः प्रकाशादिकं न पश्यतीत्याह॥ क्वेति॥ धीरस्य ज्ञानिनः अत एव निर्विकारस्य निरस्तमोहादिविकारस्य तमः क्व तमसो भा

ज्ञानाद्गलितकर्मा यो लोकदृष्ट्यापि कर्मकृत्॥ नाप्नोत्यवसरं कर्तुं वक्तुमेव न किंचन॥७७॥
क्व तमः क्व प्रकाशो वा हानं क्व च न किंचन॥ निर्विकारस्य धीरस्य निरातंकस्य सर्वदा॥७८॥
क्व धैर्यं क्व विवेकित्वं क्व निरातंकतापि वा॥ अनिर्वाच्यस्वभावस्य निःस्वभावस्य योगिनः॥७९॥
न स्वर्गो नैव नरको जीवन्मुक्तिर्न चैव हि॥ बहुनात्र किमुक्तेन योगदृष्ट्या न किंचन॥८०॥

वे च तन्निवृत्त्यप्रकाशो वा क्व निरातंकस्य कालादिभयशून्यस्य हानं च न कुत्रेत्यर्थः॥ अनुरागादिशून्यत्वाच्च किंचन किमपि आदानादिकर्मापि क्व च न कुत्रापीत्यर्थः॥७८॥ ज्ञानी त्वनिर्वाच्यस्वभाव इत्याह॥ क्व धैर्यमिति॥ योगिनो ज्ञानिनः अत एव निःस्वभावस्य अत एव अनिर्वाच्यस्वभावस्य धैर्यं क्व विवेकित्वं च क्व निरातंकतानिर्भयतापि क्वेत्यर्थः॥७९॥ ज्ञानिनस्तु स्वदृष्ट्या स्वर्गनरकौ

[right margin: ...दिकं किंचिद्दृष्टिर्नास्ति॥ इह / गतिः॥ सुगमः श्लोकः॥ २०]

विक्षेपेपीति॥ धन्यो ज्ञानी लोकदृष्ट्या विक्षेपेपि वस्तुतो न विक्षिप्तः स्वप्रकाशात्मानुभवात् लोकदृष्ट्या समाधौ प्रतीयमानेपि न समाधिमान् समाधिकर्तृत्वाध्यासाभावात् लोकदृष्ट्या जाड्ये प्रतीयमानेपि न जडः स्वानुभवशालित्वात्॥ लोकदृष्ट्या पांडित्ये प्रतीयमानेपि न पंडितः पंडितोहमित्यभिमानाभावात्॥८७॥ मुक्त इति॥ मुक्तः प्रारब्धवशाद्यथाप्राप्तस्थितो सत्यामपि स्वस्थचित्तः न यस्य कृतेन पू

अष्टा०
५१

विक्षेपेपि न विक्षिप्तः समाधौ न समाधिमान्॥ जाड्येपि न जडो धन्यः पांडित्येपि न पंडितः॥८७॥ मुक्तो यथास्थितिस्वस्थः कृतकर्तव्यनिर्वृतः॥ समः सर्वत्र वैतृष्ण्यान्न स्मरत्यकृतं कृतं॥८८॥ न प्रीयते वंद्यमानो निंद्यमानो न कुप्यति॥ नैवोद्विजेत मरणे जीवने नाभिनंदति॥८९॥ न धावति जनाकीर्णं नारण्यमुपशांतधीः॥ यथातथा यत्रतत्र सम एवावतिष्ठते॥१००॥ इत्यष्टावक्रे शांतिशतकं॥

वं कृतेन कर्तव्यं च करिष्यमाणं कर्मणा निर्वृतः संतुष्टः अभिनिवेशोद्वेगशून्यः अत एव सर्वसमः वैतृष्ण्यात् इदमकृतमिदं च कृतमिति न स्मरति॥८८॥ न प्रीयत इति॥ केश्चित्स्वस्मिन् वंद्यमानो न तुष्यति निंद्यमानो न कुप्यति॥ मरणे उपस्थिते सति उद्वेगं न प्राप्नोति॥ आत्मनो नित्यत्वानुसंधानात् अत एव जीवने सति नाभिनंदति॥८९॥ न धावतीति॥ उपशांतधीः पुरुषो जनाकीर्णं प्रदेशं नानुधावति नाप्यरण्यं प्रविशति शांतत्वात्॥ यथातथा जनसंमर्दे न तदसंमर्दप्रकारेण वा यत्र तत्र वं

[right margin: ...ज्ञानिनो समसमवस्थाविशिष्टत्वाज्ज्ञानिनो... / सुगमाः श्लोकाः॥ १००॥]

102
103

आत्मेति॥ आत्मनि विश्रान्त्या स्थितत्वात् स्वेनरूपेण एव आशारहितेन अन्तर्गलितार्तिना गलितदुःखेन ज्ञानिना यदन्तःकरणेनानुभूयेत तत्कथं कं प्रकारं धर्ममाश्रित्य कथ्यते प्रकारस्यैव धर्मस्याभावात् कस्य वा अधिकारिणः कथ्यते तादृशाधिकारिणोऽभावात्॥९३॥ सुप्त इति॥ धीरः सुषुप्तो न सुप्तः स्वप्नेऽपि शयितो न जागरेऽपि न जागर्ति अत एव स्थावन्तीयाबुद्धिस्तद्विविक्तात्मज्ञत्वात् इदमेवाभिप्रेत्याह॥ पदे पदे तृप्तः॥

आत्मविश्रान्तितृप्तेन निराशेन गतार्तिना॥ अन्तर्यदनुभूयेत तत्कथं कस्य कथ्यते॥९३॥ सुप्तोऽपि न सुषुप्तो च स्वप्नेऽपि शयितो न च॥ जागरेऽपि न जागर्ति धीरस्तृप्तः पदे पदे॥९४॥ ज्ञः सचिन्तोऽपि निश्चिन्तः सेन्द्रियोऽपि निरिन्द्रियः॥ सबुद्धिरपि निर्बुद्धिः साहंकारोऽनहंकृतिः॥९५॥ न सुखी न च वा दुःखी न विरक्तो न रागवान्॥ न मुमुक्षुर्न वा मुक्तो किंचिन्नो न च किंचन॥९६॥

सरोऽप्यविरतं नित्यानन्दानुभवतृप्तः॥९४॥ ज्ञ इति॥ योऽज्ञानी लोकदृष्ट्या चिन्तादिसहितोऽपि वस्तुतस्तद्रहितोऽविविक्तात्मदर्शित्वात्॥९५॥ न सुखीति॥ लोकगत्या सुखीत्यादिरूपोऽपि वस्तुतस्तु अन्तःकरणाध्यासरहितत्वात् न विरक्तो विषयद्वेषाभावात् न वा मुक्तः पूर्वमपि बन्धनाभावात् तथाऽकिंचनः सदैकरूपत्वात् तथा किंचिदपि न च अनिर्वाच्यत्वात्॥९६॥ ॥ ॥ ॥ ॥ ॥

इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां शान्तिशतकप्रकरणमष्टादशं॥१८॥ साधनस्वरूपेण ज्ञाते ज्ञाने गुरोः संस्तुवान्॥ शिष्यः स्वात्मनि विश्रान्तीन्त्यष्टभिः प्राह सस्फुटं॥१॥ एवं तत्त्वज्ञानिनः स्वभावभूतां शान्तिं श्रुत्वा स्वकृतार्थतया गुरुं परितोषयितुमात्मविश्रान्त्यष्टकं शिष्यः स्वयमाह॥ तत्त्वेति॥ हे गुरो मया भवतः सकाशात् तत्त्वज्ञानोपदेशमादाय स्वहृदयोदरात्

तत्त्वविज्ञानसंदेशमादाय हृदयोदरात्॥ नानाविधपरामर्शशल्योद्धारः कृतो मया॥१॥ क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकता॥ क्व द्वैतं क्व च वाऽद्वैतं स्वमहिम्नि स्थितस्य मे॥२॥ क्व भूतं क्व भविष्यद्वा वर्तमानमपि क्व वा॥ क्व देशः क्व च वा नित्यं स्वमहिम्नि स्थितस्य मे॥३॥

नानाविधपरामर्श एव यः शल्यस्तस्य उद्धारः अपहारः कृतः॥१॥ तदेव प्रपञ्चयति॥ क्व धर्म इति॥ धर्मार्थकामा अपि हृदयोदरात् निरस्ताः क्षयिष्णुत्वादित्यर्थः स्वमहिम्नि स्थितस्य मे मम विवेकता क्व। द्वैतं वाऽद्वैतं च क्व। चिन्मात्रविश्रान्तस्य विवेकाद्यनुपयोगात्॥ उत्तरोत्तरे पारेणोक्तायाः किं प्रयोजनमिति न्यायात् द्वैतस्य च ज्ञानेन बाधितत्वात् अद्वैतस्य द्वैतसापेक्षत्वेन अस्वाभाविकत्वात् विवेकादयोऽपि मम न सन्तीत्यर्थः॥२॥ क्व द्वैतमित्युक्तमेव विशेषतः प्रपञ्चयति॥ क्व

अष्टा०
५२

क्वचात्मेति॥ आत्मनिबोधेनेति आत्मनस्यचव्याप्यमपेक्ष्यकथनेनत्वमहिम्निस्थितस्यचममा
त्मादिकं नास्तीत्यर्थः॥४॥ क्वस्वप्नइति॥ स्वप्नादयोबुद्धेरेवावस्थास्तामममनसंति एतत्रितया
भावेनतन्निरूपतुरीयावस्थापिममनास्ति॥ नथाभयादयोप्यंतःकरणधर्मामममनसंती
त्यर्थः॥५॥ क्वदूरमिति॥ सर्वत्रपरिपूर्णस्यममदूरसमीपादिकंनास्तीत्यर्थः॥ पूर्णदर्शिनो

क्वचात्माक्वचवानात्माक्वशुभंक्वाशुभंतथा॥ क्वचिंताक्वचवाचिंतास्वमहिम्निस्थितस्यमे
॥४॥ क्वस्वप्नः क्वसुषुप्तिर्वाक्वचजागरणंतथा॥ क्वतुरीयंभयंवापिस्वमहिम्निस्थितस्यमे॥
॥५॥ क्वदूरंक्वसमीपंवाबाह्यंक्वाभ्यंतरंक्ववा॥ क्वस्थूलंक्वचवासूक्ष्मंस्वमहिम्निस्थितस्यमे
॥६॥ क्वमृत्युर्जीवितंवाक्वक्वलोकाःक्वास्यलौकिकं॥ क्वलयःक्वसमाधिर्वास्वमहिम्निस्थित
स्यमे॥७॥ अलंत्रिवर्गकथयायोगस्यकथयाप्यलं॥ अलंविज्ञानकथयाविश्रांतस्यम
इत्यात्मविश्रांत्यष्टकं॥१९॥ मात्मनि॥८

ममस्थूलसूक्ष्मदृष्टिरपिनास्तीत्यर्थः॥६॥ क्वमृत्युरिति॥ कालत्रयेसद्रूपस्यममजीवितम
रणोनस्तः॥ पूर्णमात्रदर्शिनोस्यममलोकाभूरादयोनसंति॥ लौकिकंकार्यमपिनास्ति॥ स्व
रूपस्यममलयःक्वसमाधिश्चक्व॥७॥ अलमिति॥ धर्मार्थकामकथयायोगाभ्यासकथया

इत्यष्टावक्रटीकायामात्मविश्रांत्यष्टकमेकोनविंशंप्रकरणं॥१९॥ आत्मविश्रांत्यभिव्यक्तो
स्वभावान्मुक्तिशालिनां॥ जीवन्मुक्तिदशांशिष्यश्चतुर्दशभिरब्रवीत॥१॥ प्रागुक्तात्मविश्रांति
फलीभूताविदुषःस्वभावभूजीवन्मुक्तिदशांशिष्यःचतुर्दशभिःश्लोकैर्निरूपयति॥ क्वभूतानी
ति॥ निरंजनेसर्वोपाधिमलशून्येसत्स्वरूपेदेहेंद्रियमनांसिक्व॥ तर्हिकिंशून्यमस्तिनेत्याह
क्वशून्यमिति॥ नहिसदात्मनिसतिशून्यंसंभवतीत्यर्थः॥ मयिनैराश्यमपिस्वाभाविकंनञ्चा

क्वभूतानिक्वदेहोवाक्वेंद्रियाणिक्ववामनः॥ क्वशून्यंक्वचनैराश्यंमत्स्वरूपेनिरंजने
॥१॥ क्वशास्त्रंक्वात्मविज्ञानंक्ववानिर्विषयंमनः॥ क्वतृप्तिःक्ववितृष्णात्वंगतद्वंद्वस्यमेसदा
॥२॥ क्वविद्याक्वचवाविद्याक्वाहंक्वेदंममक्ववा॥ क्वबंधःक्वचवामोक्षः स्वस्वरूपस्यरूपिना
॥३॥

शानिरूपत्वादित्यर्थः॥१॥ क्वेति॥ सदागतद्वंद्वस्यममशास्त्रंक्वतज्जन्यंविज्ञानंचक्व आत्मविश्रां
त्यासर्वस्यगलितप्रायत्वात॥ अतएवतृप्तिरपिनतथातृप्तिसाधनवितृष्णत्वंचचित्तत्वमपिनवि
नस्यैवगलितप्रायत्वादित्यर्थः॥२॥ क्वविद्येति॥ मयिक्व विद्यायदहंकारधर्माः इदंवाह्यं
वस्तुआनंममसंबंधःक्वद्वितीयस्यसंबंधिनोभावात तथाबंधमोक्षावपिधर्मौक्व अत्रहेतुमाह

अष्टा०
५३

क्व प्रारब्धेति ॥ प्रारब्धानि कर्माणि तथा जीवन्मुक्तिः तथा विदेहकैवल्यमेते धर्माः सदा निर्वि-
शेषस्य मे न संतीत्यर्थः ॥४॥ क्व कर्तेति ॥ सदा निःस्वभावस्य मे कर्तृत्वभोक्तृत्वनिष्क्रियस्फुर-
णानि क्व । अपरोक्षज्ञप्तिरूपं च ज्ञानं क्व । फलं विषयावच्छिन्नं यत्फलं च तत्क्वेत्यर्थः ॥५॥ 108

क्व प्रारब्धानि कर्माणि जीवन्मुक्तिरपि क्व वा ॥ क्व तद्विदेहकैवल्यं निर्विशेषस्य सर्वदा ॥४॥
क्व कर्ता क्व च वा भोक्ता निष्क्रियं स्फुरणं क्व वा ॥ क्वापरोक्षं फलं वा क्व निःस्वभावस्य मे सदा ॥
॥५॥ क्व लोकाः क्व मुमुक्षुर्वा क्व योगी ज्ञानवान् क्व वा ॥ क्व बंधः क्व च वा मुक्तः स्वस्वरूपेहमद्वये ॥६॥
क्व सृष्टिः क्व च संहारः क्व साध्यं क्व च साधनं ॥ क्व साधकः क्व सिद्धिर्वा स्वस्वरूपेहमद्वये ॥७॥

क्व लोका इति ॥ अहमित्येवं रूपेऽद्वये अहमद्वये आत्माद्वैते स्वरूपे सति लोकः क्व मुमुक्षुः
क्व योगी क्व ज्ञानवान् क्व बद्धो मुक्तो वा क्वेत्यर्थः ॥६॥ क्व सृष्टिरिति ॥ अहमद्वये आत्मा-
द्वैते स्वस्वरूपे सति सृष्टिसंहारौ साध्यसाधने साधकसिद्धिर्वा क्व ॥७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥॥ ५३

क्व प्रमातेति ॥ सर्वदा विमलस्योपाधिसंबंधमलशून्यस्य मे प्रमातृप्रमाणप्रमेयप्रमासंबंधः क्व
मम किंचिन्मात्रं नान्यत्पदार्थमात्रं क्व न च किंचित्क्व पदार्थशब्दोपि मम क्व सर्वथा संबं-
धशून्यत्वादित्यर्थः ॥८॥ क्व विक्षेप इति ॥ सर्वदा निष्क्रियस्य मे विक्षेपादिकाः क्रिया क्वेत्यर्थः
॥९॥

क्व प्रमाता प्रमाणं वा क्व प्रमेयं क्व च प्रमा ॥ क्व किंचित्क्व न किंचिद्वा सर्वदा विमलस्य मे ॥८॥
क्व विक्षेपः क्व चैकाग्र्यं क्व निर्बधः क्व मूढता ॥ क्व हर्षः क्व विषादो वा सर्वदा निष्क्रियस्य मे ॥९॥ 109
क्व चैष व्यवहारो वा क्व च सा परमार्थता ॥ क्व सुखं क्व च वा दुःखं निर्विमर्षस्य मे सदा ॥१०॥
क्व माया क्व च संसारः क्व प्रीतिर्विरतिः क्व वा ॥ क्व जीवः क्व च तद्ब्रह्म सर्वदा विमलस्य मे ॥११॥

क्व चैष इति ॥ सदा निर्विमर्षस्य विशेषज्ञानवृत्तिशून्यस्य व्यवहारः व्यावहारिकपदार्थ-
दि ज्ञानं क्व परमार्थता ज्ञानं च क्व सुखदुःखात्मकमपि क्व ॥१०॥ क्व मायेति ॥ सर्वदा विमलस्यो-
पाधिमलशून्यस्य मम माया संसारौ प्रीतिर्विरतिश्च वैराग्यं क्व जीवभावो ब्रह्मभावश्च क्वा-
प्यौपाध्याभावे जीवत्वस्य वक्तुमशक्यत्वादित्यर्थः ॥११॥ ॥॥॥॥॥॥॥॥॥॥॥॥॥॥॥

हे २ 110

श्रष्टा० ५४

क्व प्रवृत्तिरिति॥ कूटस्थस्य निष्क्रियस्य तथा निर्विभागस्य भेदरहितस्य सर्वदा स्वस्थस्य मम प्रवृत्तिर्निवृत्तिर्मुक्तिर्बंधनं च क्वेत्यर्थः॥११॥ क्वोपदेश इति॥ निरुपाधेरुपाधिशून्यस्य तथा शिवस्य नित्यानंदस्वरूपस्य उपदेशेन क्रिया क्व॥ उपदेशकं शास्त्रं क्व मायाकृतोपाध्यभावेन क्व नोपशमस्य चाभावात्॥ अत एव शिष्यश्च गुरुश्च क्व॥ स्वयं शिवस्वरूपस्य च पुरुषार्थो वा

क्व प्रवृत्तिर्निवृत्तिर्वा क्व मुक्तिः क्व च बंधनं॥ कूटस्थनिर्विभागस्य स्वस्थस्य मम सर्वदा॥१२

क्वोपदेशः क्व वा शास्त्रं क्व शिष्यः क्व च वा गुरुः॥ क्व चास्ति पुरुषार्थो वा निरुपाधेः शिवस्य मे॥१३॥ क्व चास्ति क्व च वा नास्ति क्वास्ति चैकं क्व च द्वयं॥ बहुनात्र किमुक्तेन किंचिन्नोत्तिष्ठते मम॥१४॥ इति जीवन्मुक्तिचतुर्दशकं विंशं प्रकरणं॥

क्व चास्ति॥१३॥ जीवन्मुक्तदशामुपसंहरति॥ क्व चास्तीति॥ ममास्तीति न स्फुरति॥ असत्त्वापेक्षत्वात् सत्त्वस्य तथा नास्तीत्यपि न स्फुरति सत्त्वापेक्षत्वान्नास्तित्वस्य॥ अत एव मिथः सापेक्षत्वाद्वैकत्वद्वित्वे अपि मम न स्तः॥ प्रत्येकं व्यक्तिभेदेन निषेधस्य कल्पकोटिभिरपि वक्तुमशक्यत्वात्सामान्यत आह॥ बहुनेति॥ बहुनोक्तेन किं प्रयोजनं मम चिदेकरूपस्य

इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां जीवन्मुक्तिचतुर्दशकं विंशं प्रकरणं॥२०

विनेयबुद्धिसौकार्यमुद्दिश्य ग्रंथकृत्स्वयं॥ श्लोकसंख्यापुरस्कृत्य प्राहानुक्रमणीं स्फुटं॥१॥ दशाष्टौ उदश श्लोका गुरुणा उपदेशोस्तु संति प्रथमे प्रकरणे पंचविंशति श्लोकाः शिष्योक्तानुभवोल्लासे द्वितीयप्रकरणेस्तु चतुर्दश श्लोकाः पुनर्गुरुणा पेक्षमुद्भयोपदेशाख्ये तृतीय

दशाष्टचोपदेशेस्तु श्लोकाश्च पंचविंशतिः॥ संत्यात्मानुभवोल्लासे उपदेशे चतुर्दश॥१॥

षडुल्लासे लये चैवमुपदेशे चतुश्चतुः॥ पंचकं स्यादनुभवे बंधमोक्षे चतुष्ककं॥२॥

प्रकरणेस्तु॥१॥ षट् श्लोकाः शिष्योक्तानुभावोल्लासे चतुर्थप्रकरणेस्तु चत्वारः श्लोका गुरुप्रोक्ते लयाख्ये पंचमप्रकरणेस्तु॥ पुनश्चत्वारः श्लोका गुरुप्रोक्ते प्रतिवादि सिद्धलयनिषेधोपदेशाख्ये प्रकरणेस्तु श्लोकानां पंचकं शिष्यप्रोक्तेऽनुभवाख्ये सप्तमे प्रकरणे स्यात् श्लोकानां चतुष्कं गुरुप्रोक्तं बंधमोक्षे ष्टमे प्रकरणे स्यात्॥२॥

१११

निर्वेदोपशमइति॥ श्लोकाष्टकंगुरुप्रोक्तेनिर्वेदाख्येनवमेप्रकरणेस्यात् गुरुप्रोक्तमुपशमाष्टकंनामदशमंप्रकरणं॥ गुरुप्रोक्तंज्ञानाष्टकंनामैकादशंप्रकरणं शिष्यप्रोक्तमेवमेवाष्टकंनामद्वादशंप्रकरणं शिष्यप्रोक्तंयथासुखसप्तकंनामत्रयोदशंप्रकरणं॥ शिष्यप्रोक्तंशांतिचतुष्कंनामचतुर्दशंप्रकरणं॥३॥

निर्वेदोपशमोज्ञानमेवमेवाष्टकंभवेत्॥ यथासुखंसप्तकंचशांतोस्याद्वेदसंमितं॥३
तत्त्वोपदेशेविंशत्त्वदशज्ञानोपदेशके॥ तत्त्वस्वरूपेविंशत्त्वशमेचशतकंभवेत्॥४॥

तत्त्वोपदेशइति॥ विंशतिश्लोका

तत्त्वोपदेशइति॥ विंशतिश्लोकागुरुप्रोक्तेतत्त्वोपदेशाख्येपंचदशेप्रकरणेस्युः॥ दशश्लोकागुरुप्रोक्तेविशेषोपदेशाख्येसप्तदशेप्रकरणेस्युः॥ गुरुप्रोक्तंशमशतकंनामाष्टादशंप्रकरणं॥४॥